[2]यद्यविसंवादलक्षणं प्रामाण्यं[2] तदा श्रोत्रज्ञानस्याधिगतार्थाप्रापकत्वात्[3] कथं प्रामाण्यमिति चेत्? न। अर्थस्वरूपप्रतीतिर्हि प्रामाण्यम्। तच्च बाह्यार्थक्रियाप्राप्ति-मन्तरेणापि सम्भवति।[4] यदुक्तम् —

'प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थिति:।
अविसंवादनम्'[5] इति।

शब्दस्य श्रुतिमात्रेणैव चरितार्थत्वात् श्रुतिरेव तत्रार्थक्रियास्थिति:[6]। यथा रविचन्द्राम्बुदचित्रादीनां दर्शनमेवार्थक्रियास्थिति:। तदुक्तम् —

'ज्ञेयस्वरूपसंवित्तिरिष्टा तत्र क्रियास्थिति:'[7] इति।

प्रथमं तु प्रेक्षावानर्थक्रियार्थितया जलानलादावर्थक्रियासन्देहादेव प्रवर्तते।

यदि नाम तस्यैव नास्ति सन्देहो मे[8] वर्तत इति[8] तथापि साधकबाधकप्रमाणाभावाद्युक्त:[9] सन्देहो भवन् केन वार्यते इति। तस्मात्

यस्मिन्नेव काले परिच्छिद्यते तस्मिन्नेव काले प्रापयितव्यमिति। अन्यो हि दर्शनकाल:, अन्यश्च प्राप्तिकाल:। किन्तु यत्कालं परिच्छिन्नं तदेव तेन प्रापणीयम्। अभेदाध्यवसायाच्च सन्तानगतमेकत्वं द्रष्टव्यमिति।

1 नास्ति–भो०।

2 यद्यर्थक्रियाप्रापणाद् अवि०–भो०, ननु यद्यर्थक्रियाप्रापणादविसंवादिलक्षणवतो लक्षणमस्ति–ख।

3 ० श्रवणविज्ञानस्य निर्धारितार्थप्रापणाकरणात्–क०।

4 ० अर्थस्वभावनिर्धारणस्य प्रामाण्ये तस्य बाह्यार्थक्रियाप्रापणाभावेऽपि कदाचित्सत्त्वात्–क०।

5 प्रमाणवार्तिकम् १/३ ।

6 प्रमाणवार्तिकम् २/३–४, प्रमाणमविसंवादिज्ञानमर्थक्रियास्थिति: । अविसंवादनं शब्देऽप्यभिप्रायनिवेदनात्॥ वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते। प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम्॥ ० शब्दाकर्णमात्रेणार्थविचारग्रहात्समानैव तत्रार्थक्रियास्थिति:। यथा चन्द्रसूर्यमेघचित्रादीनि दृष्टैवार्थक्रियास्थितानि भवन्ति–क०।

7 ०क्रिया मता–मूले०। प्र० वा० भा० पृ० ५, २१ कारिका ९

8 नास्ति–भो०।

9 साधकबाधकप्रमाणाभावादुक्त:–ख०। ० यदि तादृशसन्देहाभावे प्रवर्तयित्वा सिद्धिं कारयित्वा वापकारं करोति प्रमाणं नास्ति। यदुक्तम्—उत्पद्यमानसन्देहो येन निवर्तते इति–क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

स्थितमेतत्—आसादितनिरन्तरार्थक्रियाव्यवहारात् पटुतरप्रत्यक्षोदयादेवार्थे प्रवर्तते, मन्दबुद्धिस्तु ताद्रूप्यानुमानादिति। अत एव तु प्रत्यक्षस्य स्वतः प्रामाण्यम्। कस्यचित्तु परतः। योगिज्ञानस्य स्वसंवेदनस्य[1] च स्वत एव प्रामाण्यम्। अनुमानस्य तु निश्चयात्मकत्वात् स्वत एव प्रामाण्यम्[2]।

अपूर्वगोचरम्

तेनायमर्थः—प्रथमत एव यद्विज्ञानं विषये प्रवृत्तं तदेव प्रमाणम्, न तु तत्रैव पश्चाद्भावि ज्ञानान्तरमपि, गृहीतग्राहित्वेन तस्याप्रामाण्यात्। यथा घटं निर्विकल्पकेन ज्ञानेन दृष्ट्वा पश्चात्तस्मिन्नेव विषये घटोऽयमिति सविकल्पकं[3] ज्ञानं स्मरणरूपम्, यथा वा पर्वतादौ धूमं दृष्ट्वा वह्निरत्रेत्यनुमानज्ञानानन्तरं पुनरपि तत्रैव वह्निरत्रेत्यनुमानज्ञानम्[4]।

इन्द्रियादेरप्रमाणम्

सम्यग्ज्ञानं प्रमाणमित्युक्ते सामर्थ्याज्जडस्वभावस्येन्द्रियादेः परिच्छेदकत्वाभावात् प्रामाण्यं निरस्तम्। परिच्छेदकत्वं हि बोद्धृत्वम्। तच्च ज्ञानस्यैव निजरूपम्। तत्कथमज्ञानात्मन इन्द्रियादेः स्वरूपं भवितुमर्हतीति[5]॥

प्रमाणस्य द्वैविध्यम्, प्रत्यक्षशब्दनिर्वचनं च

तद् द्विविधं प्रत्यक्षमनुमानं चेति[6]। प्रतिगतमक्षं प्रत्यक्षम्[7]। अक्षमिन्द्रियं चक्षुःश्रोत्रघ्राणजिह्वाकायाख्यम्। तस्मादुत्पन्नं ज्ञानं प्रत्यक्षमभिधीयते।[8] ननु

---

1 ० स्वसंवेद्यज्ञानस्य–क०।
2 इत्याचार्येणोक्तम्–भो०।
3 साध्यवसायं सवि०–भो०। ० निर्विकल्पकेन दृष्ट्वा पश्चात्तत्रैव विषये यथा साध्यमध्यवसायं घटोऽयमिति–क०।
4 द्रष्टव्यः प्रमाणवार्तिकम् २/३, प्र० वा० भा० पृ० २९, १२, न्याय० बि० टी० पृ० १९, २
5 प्रमाणवार्तिकम् २/३ धीप्रमाणता प्रवृत्तेस्तत्प्रधानत्वाद् हेयोपादेयवस्तुनि।
6 प्रमाणसमुच्चयः १/२, प्रत्यक्षमनुमानं च प्रमाणे हि द्विलक्षणम्। प्र० वा० भा० पृ० १६९, ३ प्रत्यक्षानुमानञ्च प्रमाणे। न्यायबिन्दुः १/२–३, द्विविधं सम्यग्ज्ञानम् प्रत्यक्षमनुमानञ्चेति।
7 न्याय० बि० टी० पृ० ३८, १, प्रतिगतमाश्रितम् अक्षम्। अत्यादयः क्रान्तद्यर्थे द्वितीयया इति समासः। प्राप्तापन्नालङ्गतिसमासेषु परवल्लिङ्गप्रतिषेधाय अभिधेयवल्लिङ्गे सति सर्वलिङ्गः

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

यद्यक्षाश्रितं ज्ञानं प्रत्यक्षं तदा मानसादि वक्ष्यमाणं ज्ञानत्रयमिन्द्रियादनुत्पत्तेः प्रत्यक्षं न स्यात्?[1] अत्रोच्यते—प्रतिगतमक्षमिति यदुक्तं तत्प्रत्यक्षशब्दस्याव्युत्पत्तिमात्रनिमित्तं प्रतिपादितम्। प्रवृत्तिनिमित्तं तु प्रत्यक्षशब्दसायार्थसाक्षात्कारित्वमेव रूढि-वशादवगन्तव्यं पङ्कजवत्।[2] ततः स्वसंवेदनादिकमपि ज्ञानं स्वसंवेदनरूपमर्थं साक्षात्करोतीति प्रत्यक्षशब्दवाच्यं सिद्ध्यतीति ॥

अनुमानशब्दनिर्वचनम्

मीयतेऽर्थोऽनेनेति मानम्। अनुः पश्चादर्थे। पश्चान्मानमनुमानम्। लिङ्गग्रहणलिङ्गलिङ्गिसम्बन्धस्मरणयोः पश्चात् यद्विज्ञानं पर्वतादौ धर्मिणि परोक्षवस्त्वालम्बकं तदेवानुमानशब्देनाभिधीयते। एतच्च रूढिवशादवगन्तव्यम्।[3]

प्रमाणसंख्याविप्रतिपत्तिः

द्विविधवचनेन एकं त्रीणि चत्वारि पञ्च षडिति विप्रतिपत्तयो निरस्यन्ते। तथा हि—प्रत्यक्षमेवैकं प्रमाणमिति चार्वाक :। प्रत्यक्षमनुमानं शाब्दं[4] चेति सांख्यः। प्रत्यक्षमनुमानमुपमानं शाब्दं[5] चेति नैयायिकः। प्रत्यक्षमनुमानं शाब्दमुपमान-मर्थपत्तिरिति प्राभाकरः। प्रत्यक्षमनुमानं शाब्दमुपमानमर्थपत्तिरभावश्चेति मीमांसकः।

द्विविधवचनेन द्वित्वे प्राप्ते प्रत्यक्षमनुमानं चेति पुनर्यदुक्तं तदन्यथाद्वित्वनिरासार्थम्। तथा हि वैयाक रणो ब्रूते प्रत्यक्षं शाब्दं चेति प्रमाणद्वयम्[5] ॥[6]

प्रत्यक्षशब्दः सिद्धः।

8 ० तस्मादुत्पन्नं ज्ञानं प्रत्यक्षमित्यर्थः-क०।

1 न्यायबिन्दुः १/६-७

2 प्रमाणसमुच्चयः १/४, असाधारणहेतुत्वाद् व्यपदेश्यं तदिन्द्रियैः। वृत्तिश्च '०द्याश्रयादुत्पन्नं विज्ञानं, अक्षाश्रयमिति कुतः, विषयाश्रयं न भवति किं? इति चेद् आह—असाधारणेत्यादि। रूपादि-विषयास्तत्रान्तरे मनोविज्ञानसाधारणाः, असाधारणाच्च व्यवहारो दृश्यते यथा यवशब्दो यवाङ्कुर' इति।

3 ० तदेवानुमानशब्देनोच्यते इति रूढिशब्दादवगन्तव्यम्-क०।

4 ० शब्दं-क०।

5 तत्वसंग्रहः, कारिका १४६०-६२ भर्तृहरिणा प्रतिपादितं मतं तत्र निरस्तम्।

6 ० तथा चोक्तम्—प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः।
प्रमाणन्तरसद्भावः प्रतिषेधाच्च कस्यचित्॥-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

चार्वाकाभिमतानुमानाप्रमाण्यनिरसनम्

तत्र अनुमानस्य प्रामाण्यमवश्यमभ्युपगन्तव्यं चार्वाकेणेति प्रतिपाद्यते। तथा हि—स खलु प्रत्यक्षलक्षणं परप्रतिपादनाय प्रणयति। परस्य च बुद्धिर्न प्रत्यक्षा। किं तर्हि कायवाग्व्यापारादिकार्यादनुमेया[1]। ततोऽनेन कार्यलिङ्गजमनुमानं बलादभ्युपगतं[2] स्यात्। परलोकनिषेधाय चानुपलम्भाख्यं साधनमाचष्टे। अतोऽसौ स्वयमेवानुमानेन प्रमाणेन[3] व्यवहरति, नानुमानं प्रमाणमिति च ब्रुवन् कथं नाम नोन्मत्तश्चार्वाकः स्यात्[4]?

शब्दोपमानार्थापत्त्यभावानां प्रमाणान्तरत्वनिरसनम्

शाब्दं च ज्ञानं बाह्यार्थाविसंवादकत्वेन प्रमाणमेष्टव्यम्। अविसंवादकत्वं च सम्बन्धमन्तरेण न संगच्छते। न च शब्दानां बाह्यार्थेन सह[5] कश्चित्सम्बन्धोऽस्ति। तथा हि—शब्दार्थयोः सम्बन्धो भवन् तादात्म्यं तदुत्पत्तिरर्वा भवेत्। तत्र न तावत्तादात्म्यं शब्दार्थयोः, अत्यन्तभेदेन प्रतिभासनात्। तादात्म्यं ह्येकत्वमभिधीयते। भिन्नप्रतिभासयोरप्येकत्वे[6] स्वीक्रियमाणे गवाश्वादीनामप्येकत्वप्रसङ्गः।[7] नापि तदुत्पत्तिः, अन्वयव्यतिरेकाभावात्। तस्मात् तदुत्पत्तिरित्येवं वक्तुं न शक्यते। तथा हि—शब्दव्यापारमन्तरेण स्वहेतोरेव[8] मृत्पिण्डदण्डसलिलकुलालचक्रादेः[9]

---

1 ० कायवाग्व्यापारकार्यादनु०-भो०।
2 ० बलादभ्युपेतं-क०।
3 ० नास्ति-भो०।
4 ० नास्ति-भो०। ० स्वयमेवानुमानेन व्यवहारन्नानुमानं प्रमाणमिति च ब्रुवाणः कथं नोन्मत्तः?-क०। र० की० नि० पृ० ९६, २५-३०, न च चार्वाकोऽप्यनुमानमनवस्थाप्य स्थातुं प्रभवति, व्यापारत्रयकरणात्। तच्छास्त्रे हि प्रत्यक्षेतरसामान्ययोः प्रमाणेतरविधानं लक्षणप्रणयनतो विधातव्यम्। तच्च लक्षणं प्रत्यक्षे धर्मिणि लक्ष्ये प्रामाण्ये प्रत्येतव्ये स्वभावो हेतुः। परबुद्धिप्रतिपत्तौ च कायादिव्यापारः कार्यहेतुः। परलोकप्रतिषेधे च दृश्यानुलम्भोऽङ्गीकर्तव्य इति कथमनुमानापलापः।
5 बाह्यार्थे-भो०।
6 ० भिन्नप्रतिभासेऽप्येकत्वे-क०।
7 ० गवाश्वयोरप्येकत्वप्रसङ्गः-क०।
8 स्वहेतोः-भो०।
9 ० सलिलचक्रादेः-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सकाशादुत्पद्यमानो घटादिरर्थो दृश्यते। शब्दोऽपि बाह्यार्थं विनैव पुरुषेच्छामात्रेण ताल्वादिव्यापारादेवोत्पद्यते[1]।

अथ तादात्म्यतदुत्पत्तिभ्यामन्य एव वाच्यवाचकत्वलक्षणः शब्दार्थयोः वास्तवः सम्बन्धधोऽस्ति।[2] एवं तर्ह्यसंकेतविदोऽपि पुरुषस्य[3] शब्दादुच्चरितान्नियता-र्थप्रतीतिः प्राप्ता, योग्यता[4]मात्रेणैव प्रदीपात् घटादिप्रतीतिवत्। न चैतदस्ति। तथा हि—अभिनवो नालिकेरद्वीपादायातः पुमानग्निशब्दं[5] श्रुत्वाऽप्यग्निशब्दान्न किञ्चिदर्थं प्रत्येतीति[6]।

अथ तांस्तान् संकेतानपेक्ष्य तत्तदर्थप्रत्यायनयोग्य एवायं शब्दो जायत इत्युच्यते। तन्न। न ह्येवमस्य प्रामाण्यमवतिष्ठते। सर्वत्र संकेतस्य योग्यत्वात्। ततो न ज्ञायते किं विवक्षितार्थमाह, आहोस्विदन्यं वेति[7]।

अस्तु वा अन्य एव कश्चित्सम्बन्धः। तथा च सोऽपि केन सम्बन्धेन तयोः सम्बद्ध इति प्रष्टव्यः। अन्येन चतुर्थेन सम्बन्धेनेति चेत्, चतुर्थोऽपि तेषु केन

---

1 र० की० नि० पृ० ९९, १५-२३, अत्रोच्यते—चोदनायास्तावद् बाह्येऽर्थे प्रतिबन्धाभावान्न प्रामाण्यम्। प्रयोगः—यस्य यत्र प्रतिबन्धो नास्ति न तस्य तत्र प्रामाण्यम्। यथा दहनेऽप्रतिबद्धस्य रासभस्य। अप्रतिबद्धाश्च बहिरर्थे वैदिकाः शब्दाः इति व्यापकानुपलब्धिः। न तावदयमसिद्धो हेतुः। शब्दानां वस्तुतः प्रतिबन्धाभावात्। प्रतिबद्धस्वभावता हि प्रतिबन्धः। न च सा निर्निबन्धना, सर्वेषां सर्वत्र प्रतिबद्धस्वभावताप्रसङ्गात्। निबन्धनं चास्यास्तादात्म्य-तदुत्पत्तिभ्यामन्यन्नोपलभ्यते, अतत्स्वभावस्यातदुत्पत्तेश्च तत्राप्रतिबद्धस्वभावत्वात्। न हि शब्दानां बहिरर्थस्वभावतास्ति भिन्नप्रतिभासावबोधविषयत्वात्। नापि शब्दा बहिरर्थादुपजायन्ते, अर्थमन्तरेणापि पुरुषस्येच्छाप्रतिबद्धवृत्तेः शब्दस्योत्पाददर्शनात्।

2 ० वाच्यवाचकभावलक्षणः स्वभाविको प्रतिबन्धोऽस्ति।-क०।

3 ० प्रमातुः-क०।

4 र० की० नि० पृ० ९९, २४-२७, ननु योग्यतयैव किञ्चित् प्रतिबद्धस्भावमुपलभ्यते। यथा चक्षुरिन्द्रियं रूपे। चक्षुः खलु व्यापार्यमाणं रूपमेवोपलम्भयति। तथैवैते वैदिकाः शब्दा-स्तादात्म्यतदुत्पत्तिवियुक्ता अपि योग्यतामात्रेणातीन्द्रियमर्थं बोधियिष्यन्ति तत्कथं तादात्म्य-तदुत्पत्तिविरहमात्रेणाप्रतिबन्धो येनैवं व्यापकानुपलब्धिः सिद्ध्यतीति।

5 ० प्रमाताऽग्निशब्दं-क०।

6 र० की० नि० पृ० १००, ३०-३५, तर्हि वाच्यवाचकलक्षणः शब्दार्थयोः सम्बन्धो भविष्यति ...इति चेत्। ननु तस्य वास्तवत्वेऽसङ्केतविदोऽप्यर्थप्रतिपत्तिर्भवेदित्युक्तम्।

7 र० की० नि० पृ० १००, २७-३०, अथ तत्तत्सङ्केतापेक्षस्तत्तदर्शप्रत्यायनयोग्य एवायं जात इत्युच्यते। तदपि न प्रस्तुतोपयोगि। न ह्येवमस्य प्रामाण्यमवतिष्ठते। यदा हि सङ्केतेना-पुरुषार्थप्रतिपादनमपि संभाव्यत एव, तदा न शक्यमुपकल्पयितुं किमयमभिमतस्यैवार्थस्य द्योतको न वेति। ० विवक्षितमर्थमाहाऽन्यवेति-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सम्बन्धेन सम्बद्धः? पञ्चमेन केनचिच्चेत्, सोऽपि केनेत्यनवस्थायां अन्त्यासिद्धौ पूर्वेषामप्यसिद्धिः[1]।

अथासम्बद्ध एव शब्दार्थयोः सम्बन्ध इति चेत्। तन्न। यो न सम्बद्धः स कथं सम्बन्धो भवति घटस्येव पटः। अथ वक्तव्यं सम्बन्धस्य तादृश एव स्वभावः, येन सम्बन्धान्तरनिरपेक्ष एवं परं सम्बध्नाति? तदयुक्तम्। प्रमाणसिद्धे हि स्वभावे[2] नोत्तरमभिधीयते। यथाग्नेरेवायमीदृशः स्वभावो यदुत दाहकत्वं नाम नान्यस्याकांशादेः। सम्बन्धसिद्धौ तु प्रमाणं किञ्चिन्निरूपयन्तो न पश्यामः। न चैवं वक्तव्यं शब्दशक्तिस्वभावादेव शब्दानां नियतार्थाव्यभिचारित्वमिति। तथा हि—यदि घट इत्ययं शब्दः स्वभावादेव कम्बुग्रीवाकारं वारिसंधारणसमर्थं पदार्थमभिदधाति, तत्कथं संकेतान्तरमपेक्ष्य पुरुषेच्छया तुरगादिकमभिदध्यात्। न हि शालिबीजं स्वहेतोरङ्कुरजननस्वभावमुत्पन्नं संकेतान्तरमपेक्ष्य गर्दभं[3] जनयितुं समर्थं स्यात्[4]। नाप्याप्तप्रणीतशब्दानां[5] प्रामाण्यमभिधातुमुचितम्। आप्तत्वस्यैव निश्चेतुमशक्यत्वात्। तथा हि—आप्तत्वं क्षीणदोषत्वमुच्यते[6]। क्षीणदोषता च परचित्तवृत्तिः काचिदभिधीयते। परचित्तवृत्तीनां दुर्लक्ष्यत्वात्, कायवाग्व्यापारादिकार्यलिङ्गस्या[7]न्यथाऽपि वृत्तिदर्शनात्[8]। सरागा अपि वीतरागा इव चेष्टन्त इति न्यायात्कथमाप्तत्वं निश्चीयतामिति[9]। सम्बन्धदूषणेन च वैदिकशब्दानां प्रामाण्यं निरस्तमिति

---

1 सम्बन्धपरीक्षा ४,
द्वयोः एकाभिसम्बन्धात् सम्बन्धो यदि तद्द्वयोः।
कः सम्बन्धोऽनवस्था च न सम्बन्धमतिस्तथा ॥इति।

2 ० प्रमाणसिद्धे हि वस्तुनि स्वभावे-क०।

3 घटं-भो०।

4 र० की० नि० पृ० १००, २२-२६, अथ स्वहेतुभिरेवायमीदृशस्तेषां स्वभावो दत्तो येन ते सङ्केतविशेषसहाया एव कमप्यर्थमवबोधयन्ति। न तर्हि सङ्केतपरावृत्तौ पदार्थान्तरवृत्तयो भवेयुः। यदि ह्ययमग्निहोत्रशब्दः सङ्केतापेक्षो यागविशेषप्रतिपादकः, कथं सङ्केतान्यत्वेनार्थान्तरं प्रतिपादयति। न हि क्षित्याद्यपेक्षेण बीजेन स्वहेतोरङ्कुरजननस्वभावेनोत्पन्नेन रासभः शक्यो जनयितुम्, तथा शब्दोऽपि यदर्थप्रतिपादननियतस्तमेव प्रकाशयेत्।

5 ०नाप्यत्राप्तप्रणीत०-भो०।

6 न्यायसूत्रम् १/१/७ आप्तोपदेशः शब्दः।

7 ०कायवाग्व्यापारस्य कार्यलिङ्गस्य तु-क०।

8 ० कायवाग्व्यापारस्य कार्यलिङ्गस्य त्वन्यथाऽपि संदर्शनात्-क०।

9 र० की० नि० पृ० १०१, १८-२१, आप्तप्रणीतस्य पुनर्वचनस्यार्थाव्यभिचारे तज्जन्मनो ज्ञानस्या-

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

पृथङ्नोक्तम्। कथं तर्हि सर्वोऽयमसन्दिग्धो लौकिको व्यवहार इति चेत्। तथा तथा संकेतेन विवक्षावशादिति न काचित् क्षतिः। यथोक्तम् 'वक्तुरभिप्रायं सूचयेयुः शब्दा'[1] इति॥

नैयायिकसम्मतस्योपमानप्रमाणस्य निरसनम्

नैयायिकस्योपमानप्रपञ्चः[2]। यः प्रतिपत्ता गां जानाति[3] न गवयम्, स च अपदिष्टः[4] स्वामिना अरण्यं गत्वा गवयमानयेति। स च गवयशब्दवाच्यमर्थमजानानो वनेचरमन्यं तज्ज्ञं पुरुषं पृष्टवान्, भ्रातः, कीदृशो गवय इति। स चाह यादृशी गौस्तादृशो गवय इति।[5] तस्यारण्यगतस्य प्रेष्यपुरुषस्य अतिदेश[6] वाक्यार्थस्मरणसहकारि गवयसारूप्यज्ञानं कर्तृ अयमसौ गवयशब्दवाच्योऽर्थ इति प्रतिपत्तिं फलस्वरूपां जनयत्प्रमाणम्[7]। एतच्चायुक्तम्। यत्प्रामाण्यं[8] नाम विषयवत्तयां व्याप्तम्। न चास्य निपुणमपि निरूपयन्तो विषयं संपश्यामः। तथा हि—समाख्या नाम सम्बन्धः तस्य विषयो वर्ण्यते। स च परमार्थतो नास्ति[9]। दृश्यत्वे तस्यानुपलम्भेन बाधा। अदृश्यत्वे तस्य सत्तासाधकं प्रमाणं नेक्ष्यते। किं च—स हि

व्यभिचारसंभवेऽपि न प्रामाण्यमुपगन्तुं शक्यते, परचित्तवृत्तीनामशक्यनिश्चयत्वेनासत्वापरिज्ञानात् वचनस्यापि तत्प्रणीत्वाप्रतिपत्तेः।

1 द्रष्टव्यम्—प्रमाणवार्तिकः २/२ वक्तृव्यापारविषयो योऽर्थोः बुद्धौ प्रकाशते। प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम्॥

2 ०उपमानप्रपञ्चः-क०।

3 ० वेत्ति-क०।

4 ० चादिष्टः-क०।

5 ० स आह यादृग्गौस्तादृग्गवय इति-क०।

6 ० आप्तातिदेश-क०।

7 र० की० नि० पृ० ९८,२२-२७, अयमस्य प्रपञ्चः। यः प्रतिपत्ता गां जानाति न गवयम्, आदिष्टश्च स्वामिना गच्छारण्यम् गवयमानयास्मादिति, गवयशब्दवाच्यमर्थमजानानो वनेचरमन्यं वा तज्ज्ञं पृष्टवान्, भ्रातः कीदृशो गवय इति। तेन चादिष्टं यथा गौस्तथा गवय इति। तद्वय श्रुतातिदेश-वाक्यस्य कस्याञ्चिदरण्यान्यामुगतस्यातिदेशवाक्यार्थस्मरणसहकारि यद् गवयसारूप्यज्ञानं तत्प्रथमत एवासौ गवयशब्दवाच्योऽर्थ इति प्रतिपत्तिं प्रस्तुवानमुपमानं प्रमाणमिति।

8 यतः प्रामाण्यं-भो०।

9 र० की० नि० पृ० १०३, २, तथा हि समाख्यासंबन्धस्तस्य विषयो वर्ण्यते। स च परमार्थतो नास्ति।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सम्बन्धः सम्बधिभ्यां भिन्नोऽभिन्नो वा। यदा[1] भिन्नस्तदा तयोः सम्बन्धः केन सम्बन्धेनेति वाच्यम्। सम्बन्धान्तरकल्पनायामनवस्था[2]। अथाभिन्नस्तदा सम्बन्धिनावेव केवलौ। न समाख्या नाम सम्बन्धः कश्चित्[3]। अथ सम्बद्धबुद्धिजनकत्वं[4] सम्बन्धः। तन्न युक्तम्। यतः सम्बद्धावेताविति बुद्धिः स्वहेतुबलात् सम्बद्धवस्तुद्वयादपि सम्भाव्यमाना न सम्बन्धान्तरमाक्षिप्तुं[5] प्रभवति ॥

मीमांसकसम्मतस्योपमानप्रमाणस्य निरसनम्

एवं मीमांसकोपवर्णितस्यापि प्रामाण्यं निराकर्तव्यम्। तथा हि, सादृश्यविशिष्टः पिण्डः पिण्डविशिष्टं वा सादृश्यमुपमानस्य विषयस्तेन वर्ण्यते। न च सदृशवस्तुनोऽतिरिक्तं सादृश्यं व्यवस्थापयितुं शक्यते, प्रमाणेनाप्रतीतत्वात्[6]। तथा हि—यदि सदृशादतिरिक्तं[7] सादृश्यं दृश्यं स्यात्, तदा दृश्यानुलम्भग्रस्तमेतत्।[8] अथादृश्यं तदा तत्प्रतिबद्धलिङ्गाभावात् अनुमानादपि[9] कथं तत्सिद्धिः। सादृश्यप्रत्ययस्तु स्वहेतोस्तथोत्पन्नेन सदृशवस्तुनाऽपि क्रियमाणो घटत इति न तत्प्रत्ययादपि तत्सिद्धिर्युक्ता[10]। उपमानादेव सादृश्यसिद्धिरिति चेत्? न। यतः प्रमाणान्तरसिद्धयोरेव सादृश्यपिण्डयोर्यो विशेषणविशेष्यभावस्तस्योपमानविषयत्वं तेन वादिना परिकल्प्यते। तत्कथं सादृश्यमात्रस्याप्युपमानात् सिद्धिरिति[11] ॥

---

1 यदि-भो०।

2 र० की० नि० पृ० १०३, ३, स हि संबन्धः संबन्धिभ्यां भिन्नोऽभिन्नो वा। यदि भिन्नस्तदा तयोरिति कुतः?।

3 र० की० नि० पृ० १०३, १०, अथाभिन्नः तदा संबन्धिनावेव केवलाविति न समाख्यासंबन्धो नाम, यः कश्चिदुपमानस्य विषयः स्यात्।

4 ईदृक्सम्बद्ध०-भो०।

5 ० सम्बन्धन्तरमाक्षेप्तुं-क०।

6 र० की० नि० पृ० १०२, १२-१३ न सदृशवस्तुव्यतिरिक्तं सादृश्यं व्यवस्थापयितुं शक्यते, प्रमाणेनाप्रतीतत्वात्।

7 ० सदृशवस्तुव्यतिरिक्तं-क०।

8 ० दृश्यानुलम्भग्रस्तमेव तत्-क०।

9 अनुमानादिप्रसङ्गादपि-भो०।

10 र० की० नि० पृ० १०२, १३-१६ सादृश्यप्रत्ययस्तु स्वहेतोस्तथोत्पन्नेन सदृशवस्तुनापि क्रियमाणो घटत एव इति न सादृश्यमुपस्थापयितुं प्रभवति।

11 र० की० नि० पृ० १०२, १६-१९, उपमानप्रमाणबलादेव सादृश्यसिद्धिरिति चेत्। न। प्रमाणान्तरसिद्धियोरेव सादृश्यपिण्डयोर्विशेषणविशेष्यभावस्योपमानविषयत्वात् कथं

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अर्थापत्तिप्रमाणनिरसनम्

अर्थापत्तेरपि प्रामाण्यं[1] पृथङ्नोपपद्यते। तथा हि प्रत्यक्षादिप्रतीतो योऽर्थः, स येन विना नोपपद्यते तस्यार्थस्य कल्पनमर्थापत्तिरित्यर्थापत्तेर्लक्षणम्[2]। अत्रेदं चिन्त्यते—योऽसौ प्रमाणदृष्टोऽर्थः, तस्य यदि परिकल्प्यमानेन परोक्षार्थेन सह[3] कश्चित्तादाम्यलक्षणः तदुत्पत्तिलक्षणो वा प्रतिबन्धोऽस्ति तदा स्वभावलिङ्गजा कार्यलिङ्गजा वाऽसौ प्रतिपत्तिरित्यर्थापत्तिरनुमानमेव।[4] अथ नास्ति प्रतिबन्धः, तदानीमर्थापत्तिः प्रमाणमेव न भवति, असम्बन्धात् घटात्पटप्रतीतिवदिति [5]॥

अभावप्रमाणनिरसनम्

अभावस्य स्वरूपमेव तावन्नोपलभामहे,[6] कुत एव तस्य प्रामाण्यं भविष्यति। तथा हि—प्रत्यक्षादिप्रमाणानामनुत्पत्तिरभावाख्यं[7] प्रमाणं मीमांसकैरभिधीयते[8]। तत्र केयमनुत्पत्तिः ? किं प्रसज्यवृत्त्या प्रमाणानुत्पत्तिमात्रम् ? अथ

सादृश्यमात्रस्योपमानात् सिद्धिः। ततश्च सादृश्यस्यासिद्धेर्न तद्विशिष्टः पिण्डः पिण्डविशिष्टं वा सादृश्यमुपमानस्यविषयः।

1 प्रमाणादित्वं-भो०।

2 न्यायसूत्रम् २/२१ यत्राभिधीयमानेऽर्थे योऽन्योऽर्थः प्रसज्यते सोऽर्थापत्तिः। श्लोकवार्तिकः १, प्रमाणशक्तविज्ञातो यत्रार्थो नान्यथा भवेत्, अदृष्टं कल्पयेद् अन्यं सार्थापत्तिः उदाहृता। मीसांसाभाष्यम् पृ० १२, अर्थापत्तिरपि दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यत इत्यर्थकल्पितः। र० की० नि० पृ० ९९, ३-४ प्रत्यक्षादिभिः षड्भिः प्रमाणैः प्रसिद्धो योऽर्थः स येन विना न युज्यते तस्यार्थस्य कल्पनमर्थापत्तिरिति।

3 ० परोक्षेण अर्थेन सह-क०।

4 ० प्रतीतिरनुमानमेव।-क०।

5 र० की० नि० पृ० १०३, २४-२९, यस्यार्थस्य दर्शनाद् योऽर्थः परिकल्प्यते तयोर्यदि प्रतिबन्धोऽस्ति तदार्थाप्रतिपत्तिरनुमानमेव। अर्थापत्तिरिति नामान्तरकरणे नास्माकं काचिद्विप्रतिपत्तिः। तथा हि प्रमाणपरिदृष्टोऽर्थः केनचिद्विना नोपपद्यत इति कुतो लभ्यते, यदि परिदृश्यमानपरिकल्प्यमानयोः कश्चित् सम्बन्धः स्यात्। अन्यथा तेन विना नोपपद्यत इत्यह्रीकादन्यो न ब्रूयात्, घटपटवत्।

6 ० वीक्षामहे-क०।

7 ० प्रत्यक्षादीनामनुत्पत्तिरभावाख्यं-क०।

8 श्लोक० वा० पृ० ४७५, प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते। वस्तुसत्ताबोधावबोधार्थं तत्राभावप्रमाणता॥ र० की० नि० पृ० ९९, ६-७, प्रत्यक्षानुमानादिप्रमाणपञ्चकाभावस्वभावमभावाख्यं प्रमाणम्। प्रमेयं घटाद्यभावः। नास्तीह घटादीति ज्ञानं घटाद्यभावालम्बनं फलम्।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सम्बन्धः सम्बधिभ्यां भिन्नोऽभिन्नो वा। यदा[1] भिन्नस्तदा तयोः सम्बन्धः केन सम्बन्धेनेति वाच्यम्। सम्बन्धान्तरकल्पनायामनवस्था[2]। अथाभिन्नस्तदा सम्बन्धिनावेव केवलौ। न समाख्या नाम सम्बन्धः कश्चित्[3]। अथ सम्बद्धबुद्धिजनकत्वं[4] सम्बन्धः। तन्न युक्तम्। यतः सम्बद्धावेताविति बुद्धिः स्वहेतुबलात् सम्बद्धवस्तुद्वयादपि सम्भाव्यमाना न सम्बन्धान्तरमाक्षिप्तुं[5] प्रभवति ॥

मीमांसकसम्मतस्योपमानप्रमाणस्य निरसनम्

एवं मीमांसकोपवर्णितस्यापि प्रामाण्यं निराकर्तव्यम्। तथा हि, सादृश्यविशिष्टः पिण्डः पिण्डविशिष्टं वा सादृश्यमुपमानस्य विषयस्तेन वर्ण्यते। न च सदृशवस्तुनोऽतिरिक्तं सादृश्यं व्यवस्थापयितुं शक्यते, प्रमाणेनाप्रतीतत्वात्[6]। तथा हि—यदि सदृशादतिरिक्तं [7] सादृश्यं दृश्यं स्यात्, तदा दृश्यानुलम्भग्रस्तमेतत्।[8] अथादृश्यं तदा तत्प्रतिबद्धलिङ्गाभावात् अनुमानादपि[9] कथं तत्सिद्धिः। सादृश्यप्रत्ययस्तु स्वहेतोस्तथोत्पन्नेन सदृशवस्तुनाऽपि क्रियमाणो घटत इति न तत्प्रत्ययादपि तत्सिद्धिर्युक्ता[10]। उपमानादेव सादृश्यसिद्धिरिति चेत्? न। यतः प्रमाणान्तरसिद्धयोरेव सादृश्यपिण्डयोर्यो विशेषणविशेष्यभावस्तस्योपमानविषयत्वं तेन वादिना परिकल्ध्यते। तत्कथं सादृश्यमात्रस्याप्युपमानात् सिद्धिरिति [11] ॥

---

1 यदि–भो०।

2 र० की० नि० पृ० १०३, ३, स हि संबन्धः संबन्धिभ्यां भिन्नोऽभिन्नो वा। यदि भिन्नस्तदा तयोरिति कुतः?।

3 र० की० नि० पृ० १०३, १०, अथाभिन्नः तदा संबन्धिनावेव केवलाविति न समाख्यासंबन्धो नाम, यः कश्चिदुपमानस्य विषयः स्यात्।

4 ईदृक्सम्बद्ध०–भो०।

5 ० सम्बन्धन्तरमाक्षेप्तुं–क०।

6 र० की० नि० पृ० १०२, १२-१३ न सदृशवस्तुव्यतिरिक्तं सादृश्यं व्यवस्थापयितुं शक्यते, प्रमाणेनाप्रतीतत्वात्।

7 ० सदृशवस्तुव्यतिरिक्तं–क०।

8 ० दृश्यानुलम्भग्रस्तमेव तत्–क०।

9 अनुमानादिप्रसङ्गादपि–भो०।

10 र० की० नि० पृ० १०२, १३-१६ सादृश्यप्रत्ययस्तु स्वहेतोस्तथोत्पन्नेन सदृशवस्तुनापि क्रियमाणो घटत एव इति न सादृश्यमुपस्थायितुं प्रभवति।

11 र० की० नि० पृ० १०२, १६-१९, उपमानप्रमाणबलादेव सादृश्यसिद्धिरिति चेत्। न। प्रमाणान्तरसिद्धियोरेव सादृश्यपिण्डयोर्विशेषणविशेष्यभावस्योपमानविषयत्वात् कथं

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अर्थापत्तिप्रमाणनिरसनम्

अर्थापत्तेरपि प्रामाण्यं[1] पृथङ्नोपपद्यते। तथा हि प्रत्यक्षादिप्रतीतो योऽर्थः, स येन विना नोपपद्यते तस्यार्थस्य कल्पनमर्थापत्तिरित्यर्थापत्तेर्लक्षणम्[2]। अत्रेदं चिन्त्यते—योऽसौ प्रमाणदृष्टोऽर्थः, तस्य यदि परिकल्प्यमानेन परोक्षार्थेन सह[3] कश्चित्तादाम्यलक्षणः तदुत्पत्तिलक्षणो वा प्रतिबन्धोऽस्ति तदा स्वभावलिङ्गजा कार्यलिङ्गजा वाऽसौ प्रतिपत्तिरित्यर्थापत्तिरनुमानमेव।[4] अथ नास्ति प्रतिबन्धः, तदानीमर्थापत्तिः प्रमाणमेव न भवति, असम्बन्धात् घटात्पटप्रतीतिवदिति [5]॥

अभावप्रमाणनिरसनम्

अभावस्य स्वरूपमेव तावन्नोपलभामहे,[6] कुत एव तस्य प्रामाण्यं भविष्यति। तथा हि—प्रत्यक्षादिप्रमाणानामनुत्पत्तिरभावाख्यं[7] प्रमाणं मीमांसकैरभिधीयते[8]। तत्र केयमनुत्पत्तिः ? किं प्रसज्यवृत्त्या प्रमाणानुत्पत्तिमात्रम् ? अथ

सादृश्यमात्रस्योपमानात् सिद्धिः। ततश्च सादृश्यस्यासिद्धेर्न तद्विशिष्टः पिण्डः पिण्डविशिष्टं वा सादृश्यमुपमानस्यविषयः।

1 प्रमाणादित्वं-भो०।

2 न्यायसूत्रम् २/२१ यत्राभिधीयमानेऽर्थे योऽन्योऽर्थः प्रसज्यते सोऽर्थापत्तिः। श्लोकवार्तिकः १, प्रमाणशक्तविज्ञातो यत्रार्थो नान्यथा भवेत्, अदृष्टं कल्पयेद् अन्यं सार्थापत्तिः उदाहृता। मीसांसाभाष्यम् पृ0 १२, अर्थापत्तिरपि दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यत इत्यर्थकल्पितः। र0 की0 नि0 पृ0 ९९, ३-४ प्रत्यक्षादिभिः षड्भिः प्रमाणैः प्रसिद्धो योऽर्थः स येन विना न युज्यते तस्यार्थस्य कल्पनमर्थापत्तिरिति।

3 ० परोक्षेण अर्थेन सह-क०।

4 ० प्रतीतिरनुमानमेव।-क०।

5 र0 की0 नि0 पृ0 १०३, २४-२९, यस्यार्थस्य दर्शनाद् योऽर्थः परिकल्प्यते तयोर्यदि प्रतिबन्धोऽस्ति तदार्थाप्रतिपत्तिरनुमानमेव। अर्थापत्तिरिति नामान्तरकरणे नास्माकं काचिद्विप्रतिपत्तिः । तथा हि प्रमाणपरिदृष्टोऽर्थः केनचिद्विना नोपपद्यत इति कुतो लभ्यते, यदि परिदृश्यमानपरिकल्प्यमानयोः कश्चित् सम्बन्धः स्यात् । अन्यथा तेन विना नोपपद्यत इत्यह्रीकादन्यो न ब्रूयात्, घटपटवत्।

6 ० वीक्षामहे-क०।

7 ० प्रत्यक्षादीनामनुत्पत्तिरभावाख्यं-क०।

8 श्लोक0 वा0 पृ0 ४७५, प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते। वस्तुसत्ताबोधावबोधार्थं तत्राभावप्रमाणता॥ र0 की0 नि0 पृ0 ९९, ६-७, प्रत्यक्षानुमानादिप्रमाणपञ्चकाभावस्वभावमभावाख्यं प्रमाणम्। प्रमेयं घटाद्यभावः। नास्तीह घटादीति ज्ञानं घटाद्यभावालम्बनं फलम्।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

पर्युदासवृत्त्या वस्त्वन्तरम् ? वस्त्वन्तरमपि जडरूपं, ज्ञानरूपं वा ?[1] ज्ञानमपि किं ज्ञानमात्रम् एकज्ञानसंसर्गिवस्तुनो ज्ञानं वा ? तत्र न तावत् प्रसज्यरूपोऽभावो युज्यते[2]। तस्य सर्वशक्तिशून्यत्वात् परिच्छेदकत्वं वा कथं भवेत् ?[3] अत एव केनापि न तत्प्रतिपद्यते। यदाह पण्डितचक्रचूडामणिः—

'नाभावः कस्यचित्प्रतिपत्तिः प्रतिपत्तिहेतुर्वा।
तस्यापि कथं प्रतिपत्तिः[4]इति।

नापि जड़रूपम्, जडस्य परिच्छेदकत्वाभावात्। न हि जडरूपं शकटादिकं घटं परिच्छिनत्तीति क्वापि दृष्टं श्रुतं वेद्मि। नापि ज्ञानमात्रम्, देशकालस्वभावविप्रकृष्टस्यापि सुमेरुशंखचक्रवर्तिपिशाचादेरपि ज्ञानमात्रादभावप्रमाणादभावप्रसङ्गात्[5]। अथैकज्ञानसंसर्गिभूतलादिवस्तुज्ञानमभावोऽभिधीयते तदा प्रत्यक्षविशेषस्यैवाभावप्रमाणनामक[6]रणान्नास्माकं काचिद् विप्रतिपत्तिरिति[7]। स्थितमेतत्—प्रत्यक्षमनुमानं चेति द्विविधमेव प्रमाणमिति ॥

प्रत्यक्षलक्षणम्

---

1 ० वस्त्वन्तरमपि जडरूपं ज्ञानरूपं वा?-क०।

2 हेतु० बि० टी० पृ० १७१, ४, यत्र विधेः प्राधान्यं प्रतिषेधोऽर्थगृहीतः विधिभाक् स्वपदेन नोच्यते एकवाक्यता च तत्र पर्युदासवृत्तिता ....प्रसज्यप्रतिषेधः पुनः एतद्विपरीतो गन्तव्यः, तत्र हि प्रतिषेधस्य विधि अर्थाद् गम्यते वाक्यभेदः स्वपदेन नञा प्रतिषेधभाक् सम्बध्यते।

3 ० परिच्छेदकत्वं ज्ञानजनकत्वं वा कथं भविष्यति-क०।

4 र० की० नि० पृ० १०५, ७-८, न ह्यभावः कस्यचित् प्रतिपत्तिः प्रतिपत्तिहेतुर्वा तस्यापि कथं प्रतिपत्तिरिति।।

5 र० की० नि० पृ० १०५, ९-१२, नापि वस्त्वन्तरतापक्षे जडरूपोऽभावः सङ्गच्छते, तस्याभावलक्षणप्रमेयपरिच्छेदाभावात्,परिच्छदस्य ज्ञानधर्मत्वात्। नापि ज्ञानमात्रस्वभावोऽभावो वक्तव्यः, देशकालस्वभावविप्रकृष्टस्यापि ततोऽभावप्रसङ्गात्, तदपेक्षयापि ज्ञानमात्रत्वात् तस्य।

6 प्रत्यक्षविशेषस्यैवाभावनामकरणान्-भो०।

7 र० की० नि० पृ० १०५, १२-१४, अथैकज्ञानसंसर्गिवस्तुज्ञानस्वभावोऽनुमन्यते तदास्तमभावप्रमाणप्रत्याशया, प्रत्यक्षविशेषस्यैवाभावनामकरणात्। तस्य चास्माभिर्दृश्यानुपलम्भाख्यसधनत्वेन स्वीकृत्वात्। अतो न काचिद् विप्रतिपत्तिर्नाम।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तत्र प्रत्यक्षं कल्पनापोढमभ्रान्तम्[1]। पूर्वोपरमनुसन्धाय शब्दसङ्कीर्णाकारा[2] प्रतीतिर्जल्पाकारा वा कल्पना। यथा विज्ञपुरुषस्य सोऽयं घट इति प्रतीतिः। बालमूकतिर्यगादीनामन्तर्जल्पाकारा परामर्शरूपा वा प्रतीतिः। तथा चोक्तम्—

अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना[3] ॥ इति ॥

ननु बालमूकादीनामन्तर्जल्पाकारं कल्पनाज्ञानमस्तीति कुतो निश्चेतव्यमिति चेत्, विकल्पकार्यादिष्टानिष्टोपादानपरिहारात्[4]। दृष्टं चेदं कार्यं बालमूकादौ, ईप्तिसतार्थस्वीकरणमनीप्सितार्थत्यजनं नाम। बालमूकादिविज्ञानस्य कल्पनात्व-सूचनेन भट्टोक्तालोचनाज्ञानं[5] सविकल्पकमिति प्रतिपादितं भवति। किं पुनः कारणं कल्पनाविभ्रमात्मकं च ज्ञानं प्रत्यक्षं न स्यादिति चेत्? न।[6] अर्थस्वरूपसाक्षाकारि[7] हि ज्ञानं प्रत्यक्षमिति सर्वेषां प्रसिद्धम्[8]। न च कल्पनाविभ्रमावर्थरूपं[9] साक्षात्कर्तुं समर्थौ। तथा हि—अर्थग्राहकं ज्ञानमर्थस्य कार्यम्। अर्थो हि ग्राह्यत्वात् ज्ञानस्य कारणम्। यथोक्तम्—

भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम् ॥[10] इति ॥

कल्पनाज्ञानमर्थमन्तरेण वासनामात्रादेवोपजायमानं कथमर्थस्य कार्यं स्यात्, अर्थेन सह अन्वयव्यतिरेकाभावात्। न हि यदन्तरेणापि यद्भवति तत्तस्य कार्यम्,

---

1 न्यायबिन्दुः १/४, प्रमाणसमुच्चयः १/४ प्रत्यक्षं कल्पनापोढं। प्रमाणवार्तिकः ३/१२३, प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति।।

2 ० शब्दसंयुक्ताकारा-क०।

3 न्यायबिन्दुः १/५ ।

4 ०विकल्पकार्यस्येष्टानिष्टोपादानपरिहारस्योदयात्-क०।

5 श्लोकवार्तिकः प्रत्यक्ष, ११२, अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम्।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम्॥

6 ०न प्रमाणम् इति चेत्?-क०।

7 वस्तुस्वरूप०-भो०।

8 ०सम्मतम्-क०।

9 ०अर्थं-क०।

10 प्रमाणवार्तिकम् १/२४७ ।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अतिप्रसङ्गात्। यदि पुनः कल्पनाज्ञानमर्थादुपजायेत, तेनापि तदा घटादिरर्थो दृश्येत। ततश्चान्धस्यापि रूपदर्शनप्रसङ्गः, न चास्ति। अत एवोक्तम्—

'शाब्द्यां बुद्धावर्थस्य प्रत्यक्ष इव प्रतिभासाभावाद् नास्ति कल्पनाया अर्थसाक्षात्कारित्वम्' इति।।

एतेन यदुक्तं परेण[1] :

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।[2] इति।।

तन्निरस्तम्। तथाहि—घटे पुरोवर्तिनि उच्चार्यमाणे तत्समीपवर्ति भूतलादि-ज्ञानमुच्चारणरहितमनुभूयत एव। न च तथा तत्र शब्दानुगतो[3]ऽस्ति। न च विकल्पद्वयं सकृदिति न्यायात् ॥

भ्रान्तज्ञानम्

भ्रान्तमपि ज्ञानं नार्थसाक्षात्कारि। भ्रान्तं ह्यर्थक्रियासमर्थे वस्तुनि विपर्यस्त-मुच्यते। अर्थक्रियाक्षमं च वस्तुस्वरूपं देशकालाकारनियतं, तत्कथं विपरीतप्रतिभासिना भ्रान्तेन ज्ञानेन साक्षात्क्रियते। यदाह आचार्यः—

'तिमिराशुभ्रमणनौयानसंक्षोभाद्यनाहितविभ्रमं ज्ञानं प्रत्यक्षम्' ।।[4] इति।।

एतेन कामलिनः शुक्ले शंखे पीतप्रतिभासि ज्ञानं, भ्रमादलातादौ[5] चक्रादिनिर्भासि ज्ञानं, गच्छन्त्यां नावि स्थितस्य चलद्वृक्षादिभ्रान्तिज्ञानं,[6] गाढमर्मप्रहारहतस्य ज्वलत्[7]स्तम्भादिप्रतिभासि ज्ञानं च, न प्रत्यक्षमित्युक्तं भवति।

---

1 ०यद् उक्तं सांख्येन–क०।
2 वाक्यपदीयम्, ब्रह्मकाण्ड, कारिका १/१२३।
3 ०शब्दानुगमो–क०।
4 न्यायबिन्दुः १/६
5 ० भ्रमदलातादौ–क०।
6 चलद्वृक्षादिज्ञानं–भो०। ० स्थितस्य भ्रमद्वृक्षादिग्राहि–क०।
7 ०प्रज्वलत्–क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

ननु यदि नाम तज्ज्ञानं न प्रत्यक्षं[1] कथं ततो वस्तुप्राप्तिरिति चेत्? न ततो वस्तुप्राप्तिः। किं तर्हि, ज्ञानान्तरादेवेति केचित्[2]।

प्रत्यक्षस्य चातुर्विध्यम्

तच्चतुर्विधं[3]—इन्द्रियज्ञानं मानसं स्वसंदनं योगिज्ञानं चेति।

इन्द्रियप्रत्यक्षम्

चक्षुरादीन्द्रियपञ्चकाश्रयेणोत्पद्यमानं[4] बाह्यरूपादिपञ्चविषयालम्बन-मिन्द्रियप्रत्यक्षम्। तत्र चक्षुर्विज्ञानं रूपविषयम्। श्रोत्रविज्ञानं च शब्दविषयम्। घ्राणविज्ञानं गन्धविषयम्। जिह्वाविज्ञानं रसविषयम्। कायविज्ञानं स्पर्शविषयम्।

इन्द्रियप्रत्यक्षस्य व्यपदेशः

इन्द्रियप्रत्यक्षमिति व्यपदेशस्यासाधारणकारणत्वं निमित्तम्। यथा भेरीशब्दो यवाङ्कुर [5]इति। इदं च प्रत्यक्षं यत्रैव स्वानुरूपं विकल्पं जनयति तत्रैव प्रमाणम्, सांव्यावहारिक प्रमाणाधिकारादिति ॥

मानसप्रत्यक्षम्

---

1 ० ननु यदि तज्ज्ञानं भ्रान्तम्-क०।

2 न्याय० बि० टी० पृ० ४५-४६, ततो हि प्रवृत्तेन वृक्षमात्रमवाप्यते इति संवादकत्वात् सम्यग्ज्ञानम्, कल्पनाऽपोढत्वाच्च प्रत्यक्षमिति स्यादाशङ्का। तन्निवृत्त्यर्थम् अभ्रान्तग्रहणम्। ... यदि मिथ्याज्ञानम् कथं ततो वृक्षावाप्तिरिति चेत्, न ततो वृक्षावाप्तिः। नानादेशगामी हि वृक्षस्तेन परिच्छिन्नः। एकदेशनियतश्च वृक्षोऽवाप्यते। ततो यद्देशो गच्छद् वृक्षो दृष्टः, तद्देशो नावाप्यते। तद्देशश्चावाप्यते स न दृष्ट इति न तस्मात् कश्चिदर्थोऽवाप्यते। ज्ञानान्तरादेव तु वृक्षदिरर्थोऽवाप्यते। इत्येवमभ्रान्तग्रहणं विप्रतिपत्तिनिरासार्थम्।

3 न्यायबिन्दः १/७

4 ० चक्षुरादीन्द्रियपञ्चकाश्रयेणोत्पन्न-क०।

5 प्रमाणसमुच्चयः १/४, असाधारणहेतुत्वाद् अक्षैस्तद् व्यपदिश्यते॥ नामजात्यादि योजना। वृत्तिश्च अथ कल्पना कीदृशीत्याह—नामजात्यादि योजना, यदृच्छाशब्देषु नाम्ना डित्थ इति जातिशब्देषु यथा गौरिति इत्यादिना। न्यायबिन्दुः १/४, तत्र प्रत्यक्षं कल्पनाऽपोढम्। न्याय० बि० टी० पृ० ५६, इन्द्रियस्य ज्ञानम् इन्द्रियज्ञानम्। इन्द्रियाश्रितं यत् तत् प्रत्यक्षम्।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

स्वविषयानन्तरविषयसहकारिणेन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं मनोविज्ञानं[1] मानसम्। स्वशब्देनेन्द्रियज्ञानमभिमतम्,[2] स्वस्य विषयो[3] बाह्यो घटादिः, स्वविषयस्यानन्तरः, स्वविषयानन्तरः इन्द्रियज्ञानविषयादन्यो घटादिर्द्वितीयक्षणः। तेन सहकारिणा सह मिलित्वा, इन्द्रियज्ञानेनोपादानेन समनन्तरप्रत्ययसंज्ञकेन यज्जनितं तन्मानसं प्रत्यक्षमुच्यते। ततो यदुक्तं परेणात्र :

'गृहीतग्राहित्वमन्धबधिराद्यभावो योगिज्ञानस्यापि मानसत्व-प्रसङ्गः अव्यवहारित्वं च'[4] इति।

तन्निरस्तम्। तथा हि—द्वितीयक्षणग्रहणात् गृहीतग्राहित्वस्य निरासः। इन्द्रियज्ञानजनितं हि मानसम्। अन्धादीनां[5] रूपादिविषयालम्बनकमिन्द्रियज्ञानमेव नास्ति, कुतस्तज्जनितं मानसं भविष्यति ? अतो नास्त्यन्धबधिराद्यभावदोषः। समनन्तरप्रत्ययविशेषणेन योगिज्ञानस्य[6] मानसप्रत्यक्षप्रसङ्गो निरस्तः। समनन्तरप्रत्ययशब्दः स्वसन्तानवर्तिन्युपादानज्ञाने रूढ्या प्रसिद्धः। ततो भिन्नसन्तानवर्तियोगिज्ञानमपेक्ष्य पृथग्जनचित्तानां समनन्तरप्रत्ययव्यपदेशो नास्तीति। अव्यवहारित्वं पुनरस्य दूषणं नोपपद्यते, सूक्ष्मकालभावित्वेन पृथग्जनैर्दुर्लक्ष्यत्वात्। व्यवहाराङ्गत्वेन चानभ्युपगमात्। आगमप्रसिद्धं हि मानसप्रत्यक्षम्। न त्वस्य निश्चायकं किञ्चिदस्ति। यथोक्तं भगवता—

'द्वाभ्यां भिक्षवो रूपं गृह्यते, चक्षुषा[7] तदाकृष्टेन

---

1 न्यायबिन्दुः १/९, प्रमाणसमुच्चयः १/६,प्र० वा० भा० पृ० ३०३, ३, मानसं चार्थरागादि-स्वसंवित्तिरविकल्पिका ।

2 ० स्वशब्देनेन्द्रियज्ञानमभिप्रेतम्-क०।

3 ० तस्य विषयः स्वविषयः-क०।

4 न्या० बि० टी० टि० पृ० ३२, १९-२३, तत् परैः कुमारिलादिभिर्लक्षणमजानद्भिर्दूषितम्। तन्मनोज्ञानं यदीन्द्रियविज्ञानविषये प्रवर्तते तदा गृहीतग्राहितया प्रमाणम्, अथान्यविषये प्रवर्तते, व्यवहिते प्रत्यक्षं भवत् किं तन्मनोविज्ञानमिन्द्रियसव्यपेक्षं स्यात्, निरपेक्षं वा? इन्द्रियसव्पेक्षत्वे सतीन्द्रियविज्ञानमेव, निरपेक्षत्वे वानिन्द्रियस्यापि मनोविज्ञानं प्रत्यक्षं स्यात्यिन्धूधिराद्यभावचोद्यं कृतम्।

5 ० रूपाद्यालम्बनमिन्द्रियज्ञानमेव-क०।

6 नास्ति-क०।

7 कदाचित् चक्षुषा-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

मनसा च' [1]इति ॥

ननु च व्यवहारानुपयुक्तमुपदर्शयितुं किं प्रयोजनम्, ईदृग्लक्षणयुक्तं यदि मानसं प्रत्यक्षं स्यात्, न कश्चिद्दोषः स्यादित्यागमस्यापि विशुद्धिरनेन प्रतिपादितेति प्रयोजनम् ॥

स्वसंवेदनप्रत्यक्षम्

चित्तचैत्तानां स्वसंवेदनत्वसमर्थनम्

सर्वचित्तचैत्तानामात्मसंवेदनं स्वसंवेदनम्।[2] चित्तं वस्तुमात्रग्राहकं ज्ञानम्। चित्ते भावाः चैत्ताः, वस्तुनो विशेषरूपग्राहका सुखदुःखोपक्षालक्षणाः[3]। तेषां सर्वचित्तचैत्तानामात्मा संविद्यते येन रूपेण तत्स्वरूपमात्मस्वरूपसाक्षत्कारित्वात् स्वसंवेदनं प्रत्यक्षं कल्पनापोढमभ्रान्तं चोच्यते।

अत्र केचिदाहुः—न च चित्तचैत्तानां स्वसंवेदनं घटते,[4]स्वात्मनि क्रियाविरोधात्[2]। न च सुशिक्षितोऽपि नटवटुः स्वस्कन्धमारोढुं शक्नोति। न हि तीक्ष्णाऽप्यसिधारा स्वमात्मानं छिनत्ति। न हि प्रज्ज्वलितोऽपि वह्निस्क न्ध आत्मानं दहति। तथा चित्तचैत्तमपि कथमात्मानं वेदयतु![5] वेद्यवेदकभावो हि कर्मकर्तृभावः। कर्मकर्तृत्वं च लोके भेदेनैव प्रसिद्धम्, वृक्षसूत्रधारयोरिव। अत्रोच्यते, न कर्मकर्तृभावेन वेद्यवेदकत्वं ज्ञाने वर्ण्यते। किं तर्हि? व्यवस्थाप्यव्यवस्थापकभावेन।

---

1 धर्मोत्तरप्रदीपः पृ0 ६२, २१–२२, द्वाभ्यां भिक्षवो रूपं गृह्यते चक्षुर्विज्ञानेन तदाकृष्टेन च मनसेति। न्या0 बि0 टी0 टि0 पृ0 ३१, ३०–३१, द्वाभ्यां, भिक्षवो, रूपं दृश्यते चक्षुर्विज्ञानेन तदाकृष्टेन मनोविज्ञान इति पाठन्तरम्।

2 प्रमाणसमुच्चयः चित्तमप्यर्थरागादि स्वसंविन्निर्विकल्पकम्। वृत्तिश्च चित्तमपि रूपादीनुपलब्ध्वा यदनुभवाकारेण वर्तते, तन्निर्विकल्पकमेव। इच्छाक्रोधमोहसुखदुःखादिकं हि इन्द्रियमनपेक्ष्य भवतीति स्वसंवेदनं प्रत्यक्षमिति।

3 सुखदुःखोपेक्षादिलक्षणाः —भो०। न्याय0 बि0 टी0 पृ0 ६४, ३, चित्तं अर्थमात्रग्राहि। चैत्ता विशेषावस्थाग्राहिणः सुखादयः।

4 आत्मनि स्वक्रियाविरोधात्–भो०। ० स्वात्मनिकारित्वविरोधात्–क०।

5 ० प्रत्येतु–क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

यथा प्रदीप आत्मानं प्रकाशयति तथा ज्ञानमपि जडपदार्थविलक्षणं स्वहेतोरेव प्रकाशस्वभावमुपजायमानं स्वसंवेदनं व्यवस्थाप्यते। तथा चोक्तम्[1]—

विज्ञानं जडरूपेभ्यो व्यावृत्तमुपजायते ।
इयमेवात्मसंवित्तिरस्य याऽजडरूपता ॥[2] इति ॥

अलङ्कारकारेणाप्युक्तम्—

कल्पितः कर्मकर्त्रादिः परमार्थो न विद्यते ।
आत्मानमात्मनैवात्मा निहन्तीति निरुच्यते[3] ॥[4] इति ॥

न च चित्तचैत्तानां ज्ञानान्तरेण प्रकाश्यत्वं युज्यते। तथा हि—न तावत्समानकालभाविना ज्ञानान्तरेण चित्तचैत्तं प्रकाश्यत इति घटते, उपकार्योपकारकत्वाभावात्[5], सव्येतरगोविषाणयोरिव[6]। नापि भिन्नकालभाविना[7], क्षणिकत्वात्, प्रकाशितव्यस्यैवाभावात्।[8] अपि च यदि ज्ञानं स्वसंवेदनं न स्यात्,[9] तदा ज्ञातोऽर्थो इति दुर्घटः स्यात्,[10] 'नागृहीतविशेषणा बुद्धिर्विशेष्ये वर्त्तते'[11] इति न्यायात्।

---

1 ०यथोक्तं न्यायवादिना–क०।

2 तत्वसंग्रहः कारिका, २००० क्रियाकारकभावेन न स्वसंवित्तिरस्य तु। एकस्यानंशरूपस्य त्रैरूप्यानुपपत्तितः॥ इति ।

3 ० निरूप्यते–क०।

4 प्र० वा० भा० ३/७५७

5 प्रमाणसमुच्चयः १/१२ ज्ञानान्तरेणानुभावेऽनिष्ठा तथापि हि स्मृतिः। विषयान्तरसञ्चारस्तथा न स्यात् स चेष्यते।।

6 सव्येतरविषाणयोरिव–भो०।

7 भिन्नकालभाविना ज्ञानेन–भो०।

8 ० क्षणिकत्वात्प्रकाशस्यैवाभावात्। यदाहालङ्काकारः—
परोक्षं यदि तज्ज्ञानं ज्ञानमित्येव तत्कुतः।
परोक्षस्य स्वरूपं कस्तस्य लक्षयितुं क्षमः॥–क०।

9 ० स्वसंवेद्यं न स्यात्–क०।

10 ० ज्ञातोऽर्थ इति व्यपदेशे दुर्घटः स्यात्–क०।

11 द्रष्टव्यम् – वाक्यदीयम् तृतीयखण्डम्, पृष्ठ १०८, न्यायविनिश्चयविवरणः ५०३, २७ नागृहीतविशेषणा विशेष्ये बुद्धिः इति।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तथा हि—अर्थो विशेष्यः, ज्ञात इति विशेषणम्, ज्ञातो ज्ञानेन विशेषित इति। ज्ञानं चेत्स्वयं न बोधरूपेण प्रतीतं, तत्कथं ज्ञानेन विशेषितोऽर्थः प्रतीयताम्। न हि दण्डाग्रहणे दण्डिनो ग्रहणं युक्तिसङ्गतम्। यच्चोक्तं त्रिलोचनेन—

चक्षुषोऽग्रहणेऽपि चाक्षुषं रूपं यथा प्रतीयते, तथा
ज्ञानानवबोधेऽपि ज्ञातोऽर्थ इति घटिष्यते [1] ॥ इति ॥

तदसाधु। प्रस्तुतेऽनुपयोगात्। न हि चक्षू रूपस्य विशेषणम्। किं तर्हि? चक्षुर्विज्ञानासंवेदने[2] कथं रूपं ज्ञायतामिति चोद्यमक्षतमेव ॥.

यत्पुनर्ज्ञानस्य परोक्षत्वप्रतिपादनाय भट्टेनोक्तम्—

यथा च रूपादिप्रकाशनन्यथानुपपत्या इन्द्रियसिद्धिः, तथा
ज्ञानस्यापि सिद्धिरिति[3] ।

तथा हि तत्र भाष्यम्—

न हि कश्चिदज्ञातेऽर्थे बुद्धिमुपलभते। ज्ञाते त्वनुमानाद-
वगच्छति[4] इति ॥

वार्त्तिकं च—

तस्य ज्ञानं तु ज्ञाततावशात् । इति।

ज्ञातता च विषयप्राकटचमुच्यते। तदपि चायुक्तम्। प्राकटचस्यापि ज्ञानात् पृथक्त्वे विषयरूपतायां व्यक्तौ जडरूपता, जडस्य प्रकाशायोगात्। विषयादर्थान्तरत्वे

---

1 द्रष्टव्यः तत्त्वसंग्रहः कारिका २००७-८

2 ततो विज्ञानासंवेदने-भो०। ० किं तर्हि चक्षुर्विज्ञानम्। ततश्चक्षुर्विज्ञानासंवेदने कथं रूपं ज्ञायतामिति चोद्यमक्षतमेव। तस्मादन्यथा प्रकाशत्वासिद्धेर्यद्यमी प्रकाशन्ते तदा हेतोरेव प्रकाशस्वभावा उत्पन्नाः सन्त इति स्वीकर्त्तव्यम्।-क०।

3 द्रष्टव्यम् मीमांसाभाष्यम् ११, ५-६, न ह्यज्ञातेऽर्थे कश्चिद् बुद्धिम् उपलभते, ज्ञाते तु अनुमानाद् अवगच्छति। तत्र यौगपद्यम् अनुपपन्नम्।

4 न्यायमञ्जरी, पृष्ठ २८ ।
न ह्यज्ञातेऽर्थे कश्चिद्बुद्धिमुपलभते, ज्ञाते त्वनुमानादवगच्छतीति ॥

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

जडतायां[1] तस्यापि स्वतः प्रकाशायोगात्। प्राकट्यान्तरेण नु प्रकाशनेऽनवस्था स्यात्। ज्ञानस्वभावत्वे प्राकट्यस्यापि परोक्षत्वप्रसङ्गः। ततोऽवश्यं ज्ञानस्य स्वसंवेदनत्वमभिधेयम्। अनुभवप्रसिद्धं च स्वसंवेदनत्वं कथमपह्नूयेत? तदुक्तम्—

अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति।[2] इति।

अलङ्कारकारोऽप्याह—

परोक्षं यदि तत् ज्ञानं ज्ञातमित्येव तत्कुतः ।
परोक्षस्य स्वरूपं कस्तस्य लक्षयितुं क्षमः[3] ॥ इति॥

ननु सर्वज्ञानानां स्वसंवेदनप्रत्यक्षत्वे घटोऽयमित्यादिविकल्पज्ञानस्य निर्विकल्पकत्वं, पीतशङ्खादिज्ञानस्याभ्रान्तत्वं च कथं न भवेत् ? उच्यते—विकल्पज्ञानमपि स्वात्मनि निर्विकल्पमेव। घटोऽयमित्यनेन बाह्यमेवार्थं विकल्पयति, न त्वात्मानम्। तदुक्तम्—

शब्दार्थग्राहि यद्यत्र ज्ञानं तत्तत्र कल्पना।
स्वरूपं च न शब्दार्थस्तत्राध्यक्षमतोऽखिलम् ॥[4] इति ॥

भ्रान्तमप्यात्मन्यभ्रान्तं स्वप्रकाशरूपेणैवावभासनात्। असद्विषयत्वाच्च भ्रान्तिरुच्यते। तदुक्तम्—

स्वरूपे सर्वमभ्रान्तं पररूपे विपर्ययः[5]। इति ॥

तस्मादन्यथा प्रकाशासिद्धेः यद्यमी प्रकाशन्ते, तदा स्वहेतोरेव प्रकाशस्वभावादुत्पन्नाः सन्तः प्रकाशन्त इति स्वीकर्तव्यम् ॥

---

1 नास्ति–भो०।
2 प्रमाणविनिश्चयः द्रष्टव्यः न्यायमञ्जरी, पृ० ४७, तत्वसंग्रहः, पृ० ४९०, ७०५ ।
3 प्र० वा० भा० पृ० ३४५ कारिका ६१९
4 प्रमाणवार्तिकः २/२८७ ।
5 प्र० वा० भा० पृ० ३३१, १४, स्वरूपे तदभ्रान्तमर्थे भ्रान्तमिति।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

योगिप्रत्यक्षनिरू पणम्

भूतार्थभावनाप्रकर्षपर्यन्तजं योगिज्ञानं चेति[1]। योग: समाधि:,[2] चित्तैकाग्रतालक्षण:[3]। निश्शेषवस्तुतत्त्वविवेचिका प्रज्ञा। योगोऽस्यास्तीति योगी। योगिनो यत् ज्ञानं तत्प्रत्यक्षम्। कीदृशं तदिति चेत्? भूतार्थभावनाप्रकर्षपर्यन्तजम्। भूतार्थ: प्रमाणोपपन्नार्थ:। भावना पुन: पुनश्चेतसि समारोप:। भूतार्थभावनाप्रकर्षपर्यन्ताज्जातं यद्विज्ञानं[4] तत् कल्पनापोढमभ्रान्तम्। भूतार्थश्चतुरार्य-सत्यं दु:खसमुदयनिरोधमार्गसंज्ञकम्,[5] पञ्चस्कन्धस्वभावं क्षणिकशून्यनिरात्मक-दु:खादिरूपतया प्रतिपत्तव्यम्। यत्सत् तत् क्षणिकमित्याद्यनुमानेन प्रमाणोपपन्नमुपगन्तव्यमिति ॥

ननु भावना विकल्प:, विकल्पश्चावस्तुविषय:, तत्कथं वस्तुन: स्फुटीभावो भवतु। कथं वा विकल्पो निर्विकल्पतां व्रजेत् ? क्षणिकं च चित्तं कथमेकाग्री-भवति? विशेषश्च कस्य केन वा क्रियताम् ? शरीरी च रागादिविरहान्मुक्तश्चेति सर्वमसंगतम्। अत्रोच्यते—अवस्तुविषयोऽपि विकल्पो वस्त्वध्यवस्यतीति भावनातो वस्तुन एवात्र स्फुटीभाव:। न च विकल्प एव निर्विकल्पक:, किं तु विकल्पान्निर्विकल्पकस्योदय:। अनुभवसिद्धं चैतत् भावयतां निर्विकल्पकप्रतिभासनं, कामशोकादिवत्[6]। न हि दृष्टे किञ्चिदनुपपन्नं नाम। क्षणिकमपि चित्तं सजातीयक्षणेषु ग्रहणप्रवीणत्वात् एकाग्रमुच्यते। क्षणिकत्वेनैव विशेषोत्पत्ति:, न तु नित्यत्वेन, नित्यस्यानाधेयातिशयत्वात्। यदुक्तम्—

---

1 न्यायबिन्दु: १/११, प्रमाणसमुच्चय: १/७ योगिनां गुरुनिर्देशादसङ्कीर्णार्थमात्रदृक्॥ वृत्तिश्च-यथा चित्तं निर्विकल्पकं तथा योगिनां ज्ञानमपि भवति। योग: समाधि: स यस्यास्ति स योगी। अत्र विषयेण विषयिनिर्देश:। आगमस्य सविकल्पकत्वं निर्देशशब्देनोक्तं तेनासंकीर्णं रहितमित्यर्थ:। अनेन स्फुटाभत्वमपि गम्यते। मात्रशब्द: आरोपितव्यवच्छेदार्थ इति। प्रमाणवार्तिकम् २/२८१, प्रागुक्तं योगिनां ज्ञानं तेषां तद् भावनामयम्। विधूतकल्पनाजालं स्पष्टमेवावभासते॥

2 समाधि: प्रज्ञा च-भो०।

3 योगश्चित्तैकाग्रतालक्षण:-भो०।

4 यज्ज्ञानं-भो०।

5 ० दु:ख-समुदाय-मार्ग-निरोधलक्षणं-क०।

6 नास्ति-भो०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नित्यं तमाहुर्विद्वांसो यः स्वभावो[1] न नश्यति ।[2]

तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता।
नित्यवादपि किं तस्य[3] कस्तां क्षपयितुं क्षमः ।।[4] इति ।।

यत्तु शरीरित्वे सुखदुःखयोर्भावादनुग्रहनिग्रहात् शरीरी रागादिविरहान्मुक्त श्चेति विघटनमुक्तं, तदयुक्तम्। न हि शरीरं रागादिहेतुः, किं तु अविद्या। अनित्ये नित्यमिति, अनात्मन्यात्मेति, दुःखे सुखमिति, अशुचौ शुचितेति, चतुर्विपयासस्वभावा मिथ्योपलब्धिः। अत एव विषयसुखतृष्णा स्यात्। आत्मानं नित्यं पश्यत एव सुखाभिकाङ्क्षणादिसुखहेतु[5]रात्मीयः स्यात्। एषु चाऽऽसङ्गो रागः। एतत्प्रतिबन्धाश्च द्वेषादयः। तस्मादविद्यैव मूलं रागादेर्न तु शरीरम्। सत्यपि शरीरे यद्यविद्या न स्यात्, कुत एव रागादियोगाः ? तस्माज्जीवच्छरीरे सत्यपि अविद्याविरहात् सर्वसङ्गविरहलक्षणा मुक्तिर्वीतरागाणां भवतीति सर्वं सुस्थितम्।

प्रत्यक्षस्य स्वलक्षणविषयत्वसमर्थनम्

तस्य विषयः स्वलक्षणम्[6]। तस्य चतुर्विधस्य प्रत्यक्षस्य स्वलक्षणं विषयो बोद्धव्यः। स्वलक्षणमित्यसाधारणं वस्तुस्वरूपं देशकालाकारनियतम्। एतेनैतदुक्तं भवति—घटादिरुदकाद्याहरणसमर्थो[7] देशकालाकारनियतः पुरः प्रकाशमानोऽनित्यत्वाद्यनेकधर्मान्तरोदासीनः[8] प्रवृत्तिविषयः सजातीयविजातीयव्यावृत्तः स्वलक्षणमित्यर्थः।

---

1 ०यत्स्वभावो-क०।
2 प्रमाणवार्तिकम १/२०६ ।
3 ०नित्यत्वादचिकित्स्य-क०।
4 प्रमाणवार्तिकम् २/२२ ।
5 ०काडक्षणादिहेतु-क०।
6 न्यायबिन्दुः १/५
7 ० घटादिरुदकाद्याहरणसमर्थोऽर्थो-क०।
8 ०धर्मान्तराधारः-भो०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अयोगान्योगव्यवच्छेदयोः भेदः

ननु यदि स्वलक्षणमेव प्रत्यक्षस्य विषयो न सामान्यं तदानीं धूमदहनसामान्ययोर्व्याप्तिः कथं प्रत्यक्षेण गृह्यताम् ? नायं दोषः। यतोऽयोगव्यवच्छेदेन स्वलक्षणं तस्य विषय एव, न त्वन्ययोगव्यवच्छेदेन[1] स्वलक्षणमेव तस्य विषय इति। किं तर्हि, सामान्यमप्यस्य विषयः।

प्रमाणफ लव्यवस्था

द्विविधो हि प्रमाणस्य विषयः ग्राह्योऽध्यवसेयश्च। तत्र प्रत्यक्षस्य प्रतिभासमानं स्वलक्षणम्[2] एको ग्राह्यः। अध्यवसेयस्तु प्रत्यक्षपृष्ठभाविनो विकल्पस्य प्रतिभासमानं[3] सामान्यमेव। तच्च सामान्यं द्विविधम्, ऊर्ध्वतालक्षणं तिर्यग्लक्षणं चेति। तत्रैकस्यामेव घटादिव्यक्तौ सजातीयव्यावृत्तायामनेकक्षणसमुदायः[4] सामान्यं ऊर्ध्वतालक्षणं[5] साधनप्रत्यक्षस्य विषयः। विजातीयव्यावृत्तास्त्वनेकव्यक्तयः तिर्यक्सामान्यं व्याप्तिग्राहकप्रत्यक्षस्य विषयः। अनुमानस्य तु सामान्यं ग्राह्यं, अध्यवसेयस्तु स्वलक्षणमेव। प्रत्यक्षस्य स्वलक्षणविषयप्रतिपादने परोक्ताः षट् पदार्था न विषया इत्युक्तम्[6] यथा—अवयविद्रव्यं, गुणः, कर्म, सामान्यं, विशेषः, समवायश्चेति।[7] न चैषां प्रत्यक्षे ज्ञाने प्रतिभासोऽस्ति। न चाप्रतिभासमानो विषयो युज्यते, अतिप्रसङ्गात्।[8] तथा हि—घटादौ परिदृश्यमाने पूर्वापरादिभागं विहाय नान्यत्किञ्चिदेकमवयविद्रव्यमुपलभामहे। यदाह न्यायपरमेश्वरः—

भागा एव हि भासन्ते सन्निविष्टास्तथा तथा।

---

1 अन्ययोगविशेषणव्यवच्छेदेन-भो०।
2 एकक्षणम्-भो०।
3 नास्ति-भो०।
4 सजातीयविजातीयव्यावृत्तायामेकस्मिन्नेवानेकक्षणसमुदायः-भो०।
5 नास्ति-भो०।
6 ० एतेन यदुक्तं परेण षट् पदार्थाः प्रत्यक्षेण परिच्छिद्यन्ते ते च प्रत्यक्षस्य विषया इति तन्निरस्तम्-क०।
7 ० एते पदार्थाः पराभिमताः-क०।
8 ० इति प्रसङ्गात्-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तद्वान्नैव पुनः कश्चिद्विभागः सम्प्रतीयते [1] ॥ इति ॥

एवं गुणकर्मादीनां च दूषणं प्रत्येतब्यम् ॥

प्रमाणफलावबोधः

ननु प्रमितिरूपां क्रियां फलभूतां निष्पादयज्ज्ञानं प्रमाणमिति प्रसिद्धम्। तत्र काऽसौ प्रमितिः, यां जनयज्ज्ञानं प्रमाणमिति चेत्? उच्यते-इह नीलादेरर्थात् ज्ञानं द्विरूपमुत्पद्यते नीलाकारं, नीलबोधस्वभावं च। तत्रानीलाकारव्यावृत्त्या नीलाकारं ज्ञानं प्रमाणम्। अनीलबोधव्यावृत्त्या नीलबोधरूपं प्रमितिः। सैव फलम्। यथोक्तम्—

अर्थसारूप्यमस्य प्रमाणम्,
अर्थाधिगतिः प्रमाणफलम्[2]। इति ॥

एतच्च विकल्पप्रत्ययेन भिन्नं व्यवस्थाप्यते परमार्थतस्तु[3] नास्त्येव भेदः।

यथोक्तम्—

तदेव प्रत्यक्षं ज्ञानं प्रमाणफलम्[4]। इति ॥

प्रमाणतत्फलयोरभेदः

साकारं चेदं ज्ञानमेष्टव्यम्। यदि पुनः साकारं ज्ञानं नेष्यते, तदाऽनाकारत्वेन सर्वत्र विषये तुल्यत्वात् विभागेन विषयव्यवस्था न सिध्यति[5]। यत्पुनः केचिदाहुः—पूर्वं ज्ञानं प्रमाणं उत्तरं ज्ञानं प्रमाणफलमिति, तन्न युक्तम्। तथा हि प्रथमक्षणभावि तावज्ज्ञानं प्रमाणफलभूतस्य द्वितीयज्ञानस्यानुत्पत्तेः, फलभूतज्ञानोत्पत्तौ च पूर्वस्य[6]

---

1 हेतु० बि० टी० पृ० १०३, २५-२६, तद्वान् कश्चिद् पुनर्नैव निर्भागः प्रतिभासते ॥ इति पाठान्तरम्।
2 न्यायबिन्दुः १/२०
3 ० परमार्थवस्तुनो-क०।
4 न्यायबिन्दुः १/१८
5 ० स्यादिति-क०।
6 ० पूर्वकस्य-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

क्षणिकत्वेन विनाशात् कथं घटादिविषयं ज्ञानं प्रमाणं भवेति[1] ? नापि समानकालभावि ज्ञानं फलमुचितम्, उपकार्योपकारकत्वाभावात्, सव्येतरगोविषाणयोरिव। [तस्मात् परमार्थतः प्रमाणफलयोर्नास्ति भेदः। काल्पनिकस्तु व्यावृत्तिकृतो भेदः विकल्पबुद्धौ व्यवस्थाप्यते] ॥

इति तर्कभाषायां प्रत्यक्षपरिच्छेदः प्रथमः समाप्तः ॥

●●●

1 ० स्यात्–क० ।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

स्वार्थानुमानम्

अनुमानस्य द्वैविध्यम्ः स्वार्थानुमानलक्षणम्

अनुमानं द्विविधम्[1]—स्वार्थं परार्थं च[2]। स्वस्मै यत्तत् स्वार्थमनुमानं ज्ञानात्मकम्[3]। पर्वतादौ धर्मिणि धूमादिकं[4] दृष्ट्वा यस्य प्रतिपत्तुः वह्निज्ञानमुत्पद्यते, स एव तेन ज्ञानेन परोक्षमर्थं प्रतिपद्यते नान्य इति स्वार्थानुमानमुच्यते। परस्मै यत्तत् परार्थम्। परार्थानुमानं वचनात्मकम्[5]। त्रिरूपलिङ्गप्रतिपादकं वचनं परं प्रतिपादयति ज्ञापयतीति कृत्वा वचनमप्यनुमानशब्देनोच्यते, उपचारात्, यथा[6] आयुर्घृतमिति[7]।

अनुमानस्य कार्यम्

तत्र स्वार्थं त्रिरूपलिङ्गाद्यदनुमेये[8] ज्ञानम्[9]। रूपत्रययुक्ताल्लिङ्गादनुमेये परोक्षविषये यद् ज्ञानं प्रतिपत्तुरुत्पद्यते, तत् स्वार्थानुमानम्। तच्च धर्मविशेष[10]सम्बन्धितया साध्याविनाभावित्वनिश्चय इत्येके। अग्न्यध्यवसाय इत्यन्ये।

लिङ्गस्य त्रिरूपत्वम्

सम्प्रति लिङ्गस्य त्रिरूपत्वमुच्यते—अनुमेये सत्वमेव निश्चितम्[11]। अनुमेये[12] पर्वतादौ धर्मिणि लिङ्गस्यास्तित्वमेव निश्चितं, तदेकं रूपं पक्षधर्मतासंज्ञकम्। अत्र सत्त्वग्रहणेनासिद्धस्य निरासः,

---

1 ० द्विधा-क०।
2 न्यायबिन्दुः २/१-२
3 न्याय0 बि0 टी0 पृ0 ८८, स्वस्मायिदं स्वार्थम्। येन स्वयं प्रतिपद्यते तत् स्वार्थम्।
4 ० र्पवतादौ धूमादिकं-क०।
5 न्याय0 बि0 टी0 पृ0 ८८, परस्मायिदं परार्थम्। येन परं प्रतिपादयति तत् परमार्थम्।
6 त्रिरूपप्रतिपादकं-भो०।
7 नास्ति-भो०।
8 ० त्रिरूपलिङ्गादनुमेये परोक्षविषये ज्ञानं-क०।
9 न्यायबिन्दुः २/३
10 ०धर्मिविशेष-भो० -क०।
11 न्यायबिन्दुः २/५
12 न्यायबिन्दुः २/८

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

यथा—अनित्यश्शब्दश्चाक्षुषत्वात्[1], चाक्षुषत्वं चक्षर्विज्ञानग्राह्यत्वमुच्यते, तच्च शब्दे धर्मिणि नास्ति। एवकारेण पक्षैकदेशासिद्धस्य निरासः[2], यथा दिगम्बरप्रयोगः —चेतनास्तरवः स्वापात्। पत्रसङ्कोचलक्षणो हि स्वापः, स च सर्वेषु तरुष्वसिद्धः।[3] निश्चितग्रहणेन सन्दिग्धासिद्धस्य निरासः, यथा—अग्निरत्र वाष्पादित्वेन सन्दिह्यमानाद् भूतसंघातात्[4]। सत्वशब्दात्पश्चादेवकारेण असाधारणस्य निरासः, यथा—अनित्यश्शब्दः श्रावणत्वात् घटवत्[5] ॥

सपक्षनिरूपणम्

सपक्ष एव सत्त्वं[6] निश्चितमिति वर्तते। समानः पक्षः सपक्षः। पक्षेण सह सदृशो दृष्टान्तधर्मीत्यर्थः[7]। सपक्ष एव सत्त्वं निश्चितमित्यन्वयसंज्ञकं द्वितीयं रूपम्। अत्र सत्त्वग्रहणेन[8] विरुद्धस्य निरासः, यथा—शब्दो नित्यः कृतकत्वात् घटवत्[9]। कृतकत्वं हि नित्यत्वविपक्षेणानित्यत्वेन व्याप्तमिति विरुद्धमुच्यते। एवकारेण साधारणस्य निरासः, यथा—नित्यश्शब्दः प्रमेयत्वात् घटवत्[10]। प्रमेयत्वं हि विकल्पविषयीकृतत्वम्, तच्च सपक्षे आकाशादौ विपक्षे[11] च घटादौ सर्वत्रास्तीति[12] साधारणमुच्यते। सत्त्वशब्दात् पूर्वस्मिन्नेवकारेण सर्वसपक्षाव्यापिनोऽपि प्रयत्नानन्तरीयकस्य हेतुत्वं कथितम्। यथा—अनित्यश्शब्दः प्रयत्नानन्तरीयकत्वाद्धटवद्विद्युद्वत्। निश्चितग्रहणेन सन्दिग्धान्वयस्य निरासः,

---

1 न्यायबिन्दुः २/५८, यथा अनित्यः शब्द इति साध्ये चाक्षुत्वमुभयासिद्धम्। ०नित्यः शब्दश्चाक्षुषत्वात्-क०।
2 नास्ति-भो०।
3 ० सर्वेक्षु तरुषु न सिद्धः-क०।
4 न्यायबिन्दुः २/६, यथा बाष्पादिभावेन संदिह्यमानो भूतसङ्घातोऽग्निसिद्धावुपदिश्यमानः संदिग्धासिद्धः।
5 नास्ति-भो० -क०।
6 न्यायबिन्दुः २/५ ।
7 न्यायबिन्दुः २/७, साध्यधर्मसामान्येन समानोऽर्थः सपक्षः।
8 ० तत्र सत्तवग्रहणेन-क०।
9 नास्ति-भो०-क0। द्रष्टव्यः न्यायबिन्दुः ३/८६
10 नास्ति-भो० क०। द्रष्टव्यः न्यायबिन्दुः ३/६७
11 ० आकाशे विपक्षे-क०।
12 अस्तीति-भो०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

यथा—असर्वज्ञोऽयं कश्चित् वक्तृत्वादिष्टपुरु षवत्। इष्टपुरुषे सपक्षे च वक्तृत्वमसर्वज्ञत्वेन ब्याप्तमव्याप्तं वा न ज्ञायते ॥

विपक्षनिरूपणम्

असपक्षे चासत्त्वमेव निश्चितम्[1]। न सपक्षोऽसंपक्षः[2]। तत्रासत्त्वमेव निश्चितं व्यतिरेकसंज्ञकं तृतीयं रूपम्। अत्राप्यसत्त्वग्रहणेन विरुद्धस्य निरासः। यथा नित्यश्शब्दः कृतकत्वाद्धटवत्। विरुद्धो हि विपक्षेऽस्ति। एवकारेण साधारणस्य विपक्षैकदेशवृत्तेर्निरासः। प्रयत्नानन्तरीयकत्वे साध्ये अनित्यत्वं विपक्षैकदेशे विद्युदादावस्ति। आकाशादौ नास्ति। ततो नियमेनास्य निरासः। असत्त्ववचनात्पूर्वस्मिन्नवधारणे अयमर्थः स्यात्। विपक्ष एव यो नास्ति स हेतुः। तथा च प्रयत्नानन्तरीयकत्वं सपक्षेऽपि नास्ति, ततो न हेतुः स्यात्, ततः पूर्वं न कृतमिति। निश्चितग्रहणेन सन्दिग्धविपक्षव्यावृत्तिकस्य निरासः। यथाऽवीतरागोऽयं पुरुषो वक्तृत्वात्, रथ्यापुरुषवत्। यत्राऽवीतरागत्वं नास्ति तत्र वक्तृत्वमपि नास्ति, यथोपलखण्डे[3]। यदि नाम पाषणखण्डादुभयं व्यावृत्तं तथापि न ज्ञायते किमवीतरागत्वनिवृत्त्या पाषणखण्डाद्वक्तृत्वं निवृत्तं, अहोस्वित् स्वत एवेति।[4] ततः सन्दिग्धव्यतिरेकोऽयमनैकान्तिकः। असत्त्वशब्दात्पश्चादेवकारेण विपक्षैकदेश–वृत्तेर्निरासः[5]। यथा—प्रयत्नानन्तरीयकश्शब्दोऽनित्यत्वात्। अनित्यत्वं विपक्षादाकाशान्निवृत्तं, न विद्युतः। ततो विपक्षैकदेशवृत्तित्वमस्य ॥

त्रिरूपप्रयोगस्य प्रयोजनम्

ननु सपक्ष एव सत्त्यमित्युक्ते सामार्थ्यादेवासपक्षे चासत्त्वमिति गम्यते। तत्किमर्थमुभयोरुपादनमिति चेत्[6]?[7] विपक्षनियमार्थमिति पूर्ववृद्धाः। ते च त्रिविध

---

1 न्यायबिन्दुः २/५
2 न्यायबिन्दुः २/८
3 न्यायबिन्दुः ३/९६
4 ० किमवीतरागत्वनिवृत्तौ वक्तृत्विनिवृत्तिः पाषाणखण्डात् स्वत एव वेति–क०।
5 साधारणस्य निरासः–भो०।
6 ० तत्किर्मथमुभयोरुपादानमिति चेत्। न।–क०।
7 ० र्सवमालूनविर्शीणम्–क०। न्या0 बि0 टी0 पृ0९५, ३, ननु च सपक्ष एव सत्त्वमित्युक्ते

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

एव विपक्षो भवतीति मन्यन्ते। साध्याभावमात्रं, साध्यादन्यः, साध्येन सह विरुद्धश्च। प्रयोगनियमार्थमिति केचित्[1]। अन्वयप्रयोगो व्यतिरेकप्रयोगो वा नियमवानेकः प्रयोक्तव्यो न द्वावपीति। साधर्म्यवैधर्म्यप्रयोगसूचनार्थमिति केचित्।

त्रिलिङ्गभेदनिरूपणम्

त्रिरूपाणि च त्रीण्येव लिङ्गानि[2]। त्रीणि रूपाणि येषां तानि त्रिरूपाणि त्रीण्येव लिङ्गानि। कार्यं त्रिरूपं लिङ्गम्। स्वभावस्त्रिरूपं लिङ्गम्। अनुपलब्धिस्त्रिरूपं लिङ्गम्[3]। साधनं ज्ञापकं हेतुर्व्याप्यं चेति लिङ्गापरनामानि।

कार्यहेतुनिरूपणम्

तत्र कार्यं यथा—यत्र धूमस्तत्राग्निर्यथा महानसे, धूमश्चात्रेति। व्याप्तिपक्ष-धर्मतासंज्ञकं द्व्यवयवमेव साधनवाक्यं सौगतानाम्। अन्ये तु प्रतिज्ञाहेतुदृष्टान्तोपनय-निगमनं चेति पञ्चावयवं साधनवाक्यमाहुः[4]। उपन्यासश्चेदृशः—अग्निरत्र, धूमात्, यत्र धूमस्तत्राग्निर्यथा महानसे, तथा चायं, तस्मादग्निरिति[5]। एतच्चायुक्तम्। प्रतिज्ञावचनमात्रात्सम्बन्धरहितात् साध्यप्रतिपत्तेरयोगात्। सम्बन्धाभावस्तु शब्दार्थयोः सम्बन्धदूषणे प्रतिपादितत्वान्न पुनरुच्यते[6]। प्रतिज्ञामन्तरेण पञ्चम्यन्तहेतुप्रयोगोऽप्य-युक्तः। हेतुं विनोपनयदृष्टान्तावप्ययुक्तौ। यत्र प्रतिज्ञैव नास्ति तत्र प्रतिज्ञायाः पुनर्वचनं निगमनं कुतो भविष्यतीति सर्वमामूलं[7] विशीर्णम्[4]।

कार्यसम्बन्धनिरपणम्

विपक्षेऽसत्त्वमेवेति गम्यत एव। तत् किमर्थं पुनरुभयोरुपादानं कृतम्।

1 न्यायबिन्दुः २/५

2 न्या० बि० टी० पृ० ९५, ४-५, अन्वयो व्यतिरेको वा नियमवानेव प्रयोक्तव्यो नान्यथेति दर्शयितुं द्वयोरप्युपादानं कृतम्।

3 न्यायबिन्दुः २/११, न्याय० बि० टी० पृ० १००, ९, प्रतिषेध्यस्य साध्यस्यानुपलब्धिस्त्रिरूपा। विधेयस्य साध्यस्य स्वभावश्च त्रिरूपः, कार्यं च।

4 न्यायसूत्रम् १/१/३२, प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः।

5 तस्मात्तथा-भो०।

6 तत्वसंग्रहः कारिका १४३१, प्रमाणवार्थिकः ४/१६-१७

7 यथा मातुलुङ्गफले रूपाद् रसानुमानम्-भो०। प्रमाणवार्तिकः ३/९, एकसामग्रमधीनस्य रूपादे रसतो गतिः। हेतुधर्मानुमानेन धूमेन्धनविकारवत्॥

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अयं च कार्यहेतुर्विषयभेदेन त्रिविधः। अग्न्यादौ साध्ये धूमादिः त्रिविधप्रत्यक्षानुपलम्भेन निश्चेतव्यः। चक्षुरादौ साध्ये ज्ञानं कादाचित्कार्योत्-पादान्निश्चीयते[1]। रूपादौ साध्ये रसादिरेकसामग्र्यधीनतया निश्चीयते, यथा मातुलुङ्गफले रसाद्रूपानुमानम्। न रूपाद्रसानुमानम्[2]। अत्र रूपे जनयितव्ये पूर्वकं रूपमुपादानम्। रसस्तु सहकारिकारणम्। पूर्वपुञ्जादुत्तरपुञ्जस्योत्पत्तौ न्याय एषः। ननूपादानसहकारिकारणयोरन्वयव्यतिरेकानुविधानस्य कार्यं प्रति तुल्यत्वात्को भेदः? उच्यते, यद्विक्रियया यन्निष्पत्तिरेकसन्ताने तत्कार्यं प्रतिपूर्वकमुपादानम्। यत्सन्तानान्तरे विशेषोदयनिमित्तं तत्सहकारिकारणम्[3]। यथा शाल्यङ्कुरे जनयितव्ये शालिबीजमुपादानम्, क्षितिसलिलादि तत्र सहकारि। तदेवं कार्यहेतुस्तदुत्पत्तिसम्बन्धाद् गमक इति स्थितम् ॥

स्वभावहेतुनिरूपणम्

स्वभावो यथा—स्वभावः स्वसत्तामात्रभाविनि साध्यधर्मे[4] यो हेतुरुच्यते स तस्य साध्यस्य धर्मस्य[5] स्वभावो बोद्धव्यः। यथा—वृक्षव्यवहारयोग्योऽयं शिंशपाव्यवहारयोग्यत्वात्। अयमिति पुरः परिदृश्यमानः पदार्थो धर्मी। शिंशपाव्यवहारयोग्यत्वादिति हेतुः[6]। शिंशपाव्यवहारयोग्यत्वादिति कोऽर्थः? शाखापत्रवर्णसंस्थानविशेषव्यवहारयोग्यत्वादित्यर्थः। वृक्षव्यवहारयोग्यत्वं साध्यम्। नन्वेकत्वे साध्यसाधनभावो न युक्तः, प्रतिज्ञार्थैकदेशत्वात्? न। अभेदेऽपि कश्चित्प्रतिपत्ता शिंशपाव्यवहारं कृत्वा तत्र वृक्षव्यवहारं प्राक् कृतमपि[7] व्यामोहात्

1 ज्ञायते-भो०।
2 मातुलुङ्गे रूपानुमानम्-क०। साधनम्-भो०।
3 हेतु0 बि0 टी0 पृ0 ९४, २६, ९५, ९, स्याद् एतत्, सर्वेषाम् अन्वयव्यतिरेकौ अनुविधीयेते तदा कुतोऽयम् भेदः इहोपादानभावेन नेदम् उपयुज्यते, अन्यत्र तु सहकारिभावनेनेति...तस्माद् अवस्थाऽभेदेऽपि यद् एकाकारपरामर्शप्रत्ययनिबन्धनतया स्वसन्ततिपतितकार्यप्रसूतिनिमित्तम् तद् उपादानकरणम्। यत् सन्तानान्तरे प्रागवस्थापेक्षविशेषोदयनिबन्धनम् तत् सहकारिकारणम्।
4 न्यायबिन्दुः २/१५ ।
5 ० साध्यर्धमस्य-क०।
6 साधनम्-भो०।
7 ० प्राकृतमपि-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

किञ्चिदारोप्य पुनर्न करोति। स इदानीं स्वभावहेतुना व्यवहार्यते[1]। तस्मादेतयोः परमार्थत एकत्वेऽपि विकल्पबुद्धौ व्यावृत्तिसमाश्रयेण समुत्पन्नायां भेदेन प्रतिभासनात् साध्यसाधनत्वं न विरुध्यत इति ॥

अनुपलब्धिहेतुनिरूपणम्

अनुपलब्धिर्यथा—नास्तीह प्रदेशे घटः, उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः[2]। उपलब्धिलक्षणप्राप्तस्येति दृश्यस्येत्यर्थः।

नन्वसतः कथं दृश्यता ? एकेन्द्रियज्ञानग्राह्ये प्रदेशादावुपलभ्यमाने यदि घटः स्यात् दृश्य एव भवेदिति। उपलम्भप्रत्ययान्तरसाकल्यात् दृशतया सम्भावितः, न तु दृश्य एव[3]। तस्यानुपलब्धेरिति हेतुः। स चैकज्ञानसंसर्गिपदार्थादेकज्ञान-संसर्गिपदार्थोपलम्भाद्वा[4] निश्चीयत इति तदुभयं कर्मकर्तृभावेन पर्युदासवृत्त्या अनुपलब्धिरुच्यते, न तु प्रसज्यवृत्त्या[5] उपलब्धिनिवृत्तिमात्रम्। तद्धि स्वयमेव न किञ्चिदिति कथं साधनं स्यात्। नापि प्रतिषेध्यादन्यस्य ज्ञानमात्रम्, रूपोपलम्भादपि नारङ्गरसनिषेधप्रसङ्गात्। तस्मान्निषेध्यादन्यद्विशिष्टमेव वस्तुद्वयं प्रदेशः प्रदेशज्ञानं वाऽनुपलब्धिरिति स्थितम्।

अभावोऽसाध्यः

अत एवाभावो न साध्यते। तस्य घटविविक्तप्रदेशग्राहिणा प्रत्यक्षेणैव सिद्धत्वात्[6]। अभावव्यवहारस्तु मृढं प्रति अनुलम्भेन साध्यते। तथा हि—कश्चिन्मूढो

---

1 न्या० बि० टी० पृ० ९०६, ११-१४

2 न्यायबिन्दुः २/१३ ।

3 न्यायबिन्दुः २/१३, न्या० बि० टी० पृ० १०३

4 न्याय० बि० टी० पृ० १०२, ३-७, तस्मात् स एव घटविविक्तप्रदेशस्तदालम्बनं च ज्ञानं दृश्यानुपलम्भनिश्यहेतुत्वात् दृश्यानुपलम्भ उच्यते। .....ततो वस्तु अनुपलम्भ उच्यते, तज्ज्ञानं च। दर्शननिवृत्तिमात्रं तु स्वयमनिश्चितत्वादगमकम्।

5 हेतु० बि० टी० पृ० १७१, १-४, तद्वत् उपलब्धि एवानुपलब्धिः मन्तव्या। नञः प्रतिषेधविषयत्वात् कथम् भावविषयमेति चेत्, आह, पर्युदासवृत्तेति। पर्युदासेन प्रतिषेधस्यार्थस्य वर्जनेन या विशिष्टेऽर्थे वृत्तिस्तस्य तदा नञा आगृहीतप्रतिषेधस्य भावविषयता....।

6 न्याय० बि० टी० पृ० ११८, ५, अत एवाभावो न साध्यः स्वभावानुपलब्धेः सिद्धत्वात्।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

रजःप्रभृतिषु सांख्यप्रसिद्धेषु गुणेष्वनुपलम्भेन प्रवर्त्तिताभावव्यवहारोऽपि पुनः[1] सर्वं सर्वत्रास्तीति[2] स्वसिद्धान्ताभ्यासात् क्वाऽपि प्रदेशादौ घटानुपलम्भे सत्यपि नाभावव्यवहारं करोतीत्यनुपलम्भेन त्रिविधो व्यवहारः कार्यते[2] । तत्र निःशङ्कगमनागमनलक्षणः[3] कायिको व्यवहारः। घटो[4] नास्तीति वाचिकः। ईदृश एव अन्तर्जल्पाकारो मानसिकश्चेति[5] ।

अनुपलब्धेर्तादात्म्यतदुत्पत्तिसम्बन्धनिरूपणम्

अनुपलम्भस्य कर्मधर्मपक्षे साध्येन सह [सादृश्ये] तादात्म्यलक्षण[6] एव सम्बन्धो[4] बोद्धव्यः। कर्तृधर्मपक्षे तु तदुत्पत्तिः। तथा हि—घटविविक्तप्रदेशः प्रदेशज्ञानं वाऽनुपलब्धिरित्युक्त म्। असद्व्यवहारयोग्यत्वं च तस्य[7] स्वभावः [न कार्यं] ज्ञानं तु प्रदेशस्य कार्यमिति ॥

अनुपलब्धेर्व्यपदेशः

ननु यद्यनुपलब्धेरपि तादात्म्यतदुत्पत्ती एव सम्बन्धौ, कथं तर्हि कार्य-स्वभावाभ्यामनुपलब्धेर्भेदः ? प्रतिषेधसाधनात् भेदो न वस्तुतः। यथोक्त माचार्येण—

अत्र द्वौ वस्तुसाधनौ, एकः प्रतिषेधहेतुः[8] इति।

उपलब्धिलक्षणप्राप्तत्वविशिष्टेन[9] देशविपकृष्टे सुमेर्वादौ कालविप्रकृष्टे भविष्यच्छङ्खचक्रवर्त्यादौ स्वभावविप्रकृष्टे पिशाचादावनुपलम्भमात्रसम्भवेऽपि[10] नाभावव्यवहार इत्युक्तं भवति[11] ।

---

1 सर्वमस्तीति-भो०।
2 प्रमाणवार्तिकम ४/२६३, इत्यज्ञज्ञापनायैकानुपाख्योदाहृतिर्मता॥
3 निष्प्रयोजनगमनागमन०-भो०। ० निःशङ्कगमनागमनादि लक्षणः -क०।
4 ० घटोऽत्र-क०।
5 प्रमाणवार्तिकम् ३/३ अप्रवृत्तिः प्रमाणानाम् अप्रवृत्तिफलाऽसति।
6 तादात्म्यसम्बन्धो-भो०।
7 ० तस्यैव-क०।
8 न्यायबिन्दुः २/१८ ।
9 ० विशेषणेन-क०।
10 ० सद्भावेऽपि-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अनुपलब्धेर्वर्तमानकाले अनागतकाले च प्रमाणम्

इयं चानुपलब्धिर्वर्तमानकाले प्रमाणं विशिष्टस्मरणसद्भावेऽतीतकाले च, अनागतकालेत्वनुपलब्धिः स्वयमेव सन्दिग्धरूपा। ततो न प्रमाणम्। [अनयाऽनुलब्ध्याऽभावव्यवहारः साध्यते, न त्वभावः। तस्य प्रत्यक्षेणैव सिद्धत्वादित्युक्तं प्राक्] यथाऽऽह न्यायवादी—

अमूढस्मृतिसंस्कारस्यातीतस्य वर्तमानस्य च प्रतिपत्तृप्रत्यक्षस्य निवृत्तिरनुपलब्धि[1]रभावव्यवहारसाधनी[2] इति।

अनुपलब्धिभेदाः

तत्र यदा दूरत्वान्निषेध्यस्यायोग्यदेशत्वं स्यात्, तदा दृश्यानुपलब्धिः साक्षात्प्रयोक्तुं न शक्यत इति कार्यानुपलब्ध्यादयः प्रयुज्यन्ते। अत एवेयं प्रयोगभेदेन षोडशधा भवति। (१) तत्र स्वभावानुपलब्धिर्यथा—नास्त्यत्र धूमः, उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः[3]। प्रतिषेध्यस्य धूमस्य यः स्वभावः तस्येहानुपलब्धिः। (२) कार्यानुपलब्धिर्यथा—नेहाप्रतिबद्धसामर्थ्यानि धूमकारणानि सन्ति, धूमाभावात्। प्रतिषेध्यानां हि धूमकारणानां कार्यं धूमः, तस्येहानुपलब्धिः[4]। (३) कारणानुपलब्धिर्यथा—नास्त्यत्र धूमः दहनाभावात्। प्रतिषेध्यस्य धूमस्य कारणं दहनः, तस्येहानुपलब्धिः[5]। (४) व्यापकानुपलब्धिर्यथा—नात्र शिंशपा, वृक्षाभावात्। प्रतिषेध्यायाः शिंपायाः व्यापको वृक्षः, तस्येहानुपलब्धिः[6]। (५) स्वभावविरुद्धोपलब्धिर्यथा—नात्र शीतस्पर्शः, वह्नेरिति। प्रतिषेध्यस्य शीतस्पर्शस्य यः

---

11 न्यायबिन्दुः २/२७

1 ०निवृत्तिरनुपलब्धिः-मूले नास्ति।।

2 न्यायबिन्दुः २/२८

3 न्यायबिन्दुः २/३१

4 न्यायबिन्दुः २/३२

5 न्यायबिन्दुः २/३९

6 न्यायबिन्दुः २/३३

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

स्वभावः तस्य विरुद्धो वह्निः तस्य चेहोपलब्धिः[1]। (६) कार्यविरुद्धोपलब्धिर्यथा—नेहाप्रतिबद्धसामर्थ्यानि शीतकारणानि सन्ति, वह्नेरिति। अन्त्यदशाप्राप्तमेव कारणं कार्यं जनयति, न सर्वं कारणम्,[2] ततो विशेषणोपादानम्। प्रतिषेध्यानां शीतकारणानां कार्यं शीतं, तस्य विरुद्धो वह्निः, तस्येहोपलब्धिः[3]। (७) कारणविरुद्धोपलब्धिर्यथा—नास्य रोमहर्षादिविशेषाः सन्ति, सन्निहितदहन-विशेषत्वात्। प्रतिषेध्यानां रोमहर्षादिविशेषाणां कारणं शीतं, तस्य विरुद्धो दहनविशेषः, तस्य चेहोपलब्धिः[4]। (८) व्यापकविरुद्धोपलब्धिर्यथा—नात्र तुषारस्पर्शः, दहनात्। प्रतिषेध्यस्य तुषारस्पर्शस्य व्यापकं शीतं, तस्य[5] विरुद्धो दहनविशेषः तस्येहोपलब्धिः[6]।[7] (९) स्वभावविरुद्धकार्योपलब्धिर्यथा, नात्र शीतस्पर्शः, धूमात्। प्रतिषेध्यस्य शीतस्पर्शस्य[8] यः स्वभावस्तस्य विरुद्धोऽग्निः, तस्य कार्यं धूमः, तस्य चेहोपलब्धिः[9]। (१०) कार्यविरुद्धकार्योपलब्धिर्यथा—नेहाप्रतिबद्धसामर्थ्यानि शीतकारणानि सन्ति धूमादिति। प्रतिषेध्यानां शीतकारणानां कार्यं शीतं, तस्य विरुद्धो वह्निः, तस्य कार्यं धूमः, तस्य चेहोपलब्धिः।[10] (११) कारणविरुद्धकार्योपलब्धिर्यथा—न रोमहर्षादिविशेषयुक्त स्पर्शवानयं[11] प्रदेशो धूमादिति। प्रतिषेध्यानां हि रोमहर्षादिस्पर्शविशेषाणां कारणं शीतम्, तस्य विरुद्धोऽग्निः, तस्य कार्यं धूमः, तस्य चेहोपलब्धिः[12]। (१२) व्यापकविरुद्धकार्योपलब्धिर्यथा—नात्र तुषारस्पर्शः, धूमादिति। निषेध्यस्य तुषारस्पर्शस्य व्यापकं शीतम्, तस्य विरुद्धोऽग्निः, तस्य कार्यं धूमः, तस्य

---

1 न्यायबिन्दुः २/३४
2 ० न सर्वम्–क०।
3 न्यायबिन्दुः २/३७
4 न्यायबिन्दुः २/३९
5 ० तस्येह–क०।
6 ० तस्योपलब्धिः–क०।
7 न्यायबिन्दुः २/३८
8 ० तुषारस्पर्शस्य–क०।
9 न्यायबिन्दुः २/३४
10 ० तस्येहोपलब्धिः–क०।
11 ० पुरुषवानयं–क०।
12 न्यायबिन्दुः २/४१

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

चेहोपलब्धिः। (१३) स्वभावविरुद्धव्याप्तोपलब्धिर्यथा—नात्र वह्निः, तुषारस्पर्शात्। प्रतिषेध्यस्य हि वह्नेर्यः स्वभावस्तस्य विरुद्धं शीतम्, तेन व्याप्तस्तुषारस्पर्शः, तस्य चेहोपलब्धिः[1]। (१४) कार्यविरुद्ध-व्याप्तोपलब्धिर्यथा—नेहाप्रतिबद्धसामर्थ्यानि[2] वह्निकारणानि सन्ति, तुषारस्पर्शादिति। प्रतिषेध्यानां वह्निकारणानां कार्यं वह्निः, तस्य विरुद्धं शीतम्, तेन व्याप्तस्तुषारस्पर्शः, तस्य चेहोपलब्धिः। (१५) कारणविरुद्धव्याप्तोपलब्धिर्यथा—नात्र धूमस्तुषारस्पर्शादिति। प्रतिषेध्यस्य धूमस्य यत्कारणमग्निः, तस्य विरुद्धं शीतम्, तेन व्याप्तस्तुषारस्पर्शः, तस्य चेहोपलब्धिः। (१६) व्यापकविरुद्ध-व्याप्तोपलब्धिर्यथा—नायं नित्यः, कदाचित्कार्यकारित्वात्। प्रतिषेध्यस्य[3] नित्यत्वस्य निरतिशयत्वं व्यापकं, तस्य विरुद्धं सातिशयत्वं, तेन व्याप्तं कदाचित्कार्यकारित्वं, तस्य चेहोपलब्धिः।

एते च कार्यानुपलब्ध्यादयः पञ्चदश प्रयोगाः स्वभावानुपलब्धिस्वभावा एव प्रतिपत्तव्याः। प्रयुक्तिभेदेन परं भेदः। तत्र स्वभावानुपलम्भेनासद्[4] व्यवहारयोग्यत्वं साध्यते,[5] न त्वभावः।[6] तस्य च प्रत्यक्षेणैव सिद्धत्वात्। अपरैश्च सर्वैरभावोऽभावव्यवहारश्च साध्यते, तेषां परोक्षविषयत्वात् ॥

इति तर्कभाषायां स्वार्थानुमानपरिच्छेदो द्वितीयः सामाप्तः ॥

●●●

1 न्यायबिन्दुः २/३४
2 नेहाप्रतिबद्धानि-क०।
3 ० प्रतिषेध्यस्य हि-क०।
4 ० स्वभावानुपलब्धेरसद्-क०।
5 ० बोद्धव्याः-क०।
6 ० अभावो हि पर्युदास वृत्त्यऽनुपभ्य इत्युक्तम्-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

परार्थानुमानम्

परार्थानुमानलक्षणम्

त्रिरूपलिङ्गाख्यानं परार्थानुमानम्[1]। अन्वयव्यतिरेकपक्षधर्मतासंज्ञकानि त्रीणि रूपाणि, येन वचनेन प्रख्याप्यन्ते[2] तद्वचनमुपचारादनुमानशब्देनोच्यते ॥

तस्य द्वैविध्यम्

तद् द्विविधम् साधर्म्यवद्वैधर्म्यवच्च। साध्यधर्मिदृष्टान्तधर्मिणोर्हेतु[3]सत्ताकृतं सादृश्यं[1] साधर्म्यम्। तद्यस्यास्ति तत् साधर्म्यवत् साधनवाक्यम्। साध्यधर्मिदृष्टान्तधर्मिणोर्हेतुसत्ताकृतं[4] वैसादृश्यं[2] वैधर्म्यम्। तद्यस्यास्ति तद्वैधर्म्यवत् साधनवाक्यम्[5]।

स्वभावहेतोस्साधर्म्यवत्प्रयोगनिरू पणम्, संस्कृ तस्य सर्वस्य क्षणिक त्वसमर्थनं च

तत्र स्वभावहेतोः साधर्म्यवन्तं प्रयोगं दर्शयितुं सौत्रान्तिकमतमाश्रित्य भगवता यदुक्तं—

'संस्कृतं क्षणिकं सर्वं'[6] इति।

तद् व्युत्पाद्यते। समेत्य सम्भूय हेतुप्रत्ययैः[7] कृतं वस्तुजातं संस्कृतम्। क्षणिकमिति उत्पत्तिक्षण एव सत्त्वात्।

---

1 न्यायबिन्दुः ३/१
2 ० ख्याप्यन्ते-क०।
3 हेतुसत्ताकारसादृश्यं-भो०।
4 हेतुसत्ताकारवैसादृश्यं-भो०।
5 न्यायबिन्दुः ३/३-५, तद् द्विविधम्। साधर्म्यवद्वैधर्म्यवच्चेति। न्याय० बि० टी० पृ० १५४, ९-१०, दृष्टान्तधर्मिणा सह साध्यधर्मिणः सादृश्यं हेतुकृतं साधर्म्यमुच्यते। असादृश्यं च हेतुकृतं वैधर्म्यमुच्यते।
6 ० संसकृतं सर्वं क्षणिकमिति-क०।
7 ० हेतुभिः प्रत्ययैः-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सर्वसंकृतविनाशनिरूपणम्

'सर्वं तावत् घटादिकं वस्तु मुद्गरादिसन्निधौ नाशं गच्छत् दृश्यते। तत्र येन स्वरूपेण अन्त्यावस्थायां घटादिकं विनश्यति तच्चेत् स्वरूपमुत्पन्नमात्रस्य विद्यते तदानीमुत्पादानन्तरमेव तेन विनष्टव्यमिति व्यक्तमस्य क्षणिकत्वम्।'

अथेदृश एव स्वभावस्तस्य स्वहेतोर्जातः, यत् कियन्तं कालं स्थित्वा विनश्यतीति।

'एवं तर्हि मुद्गरादिसन्निधाने च एष एव अस्य[1] स्वभाव इति पुनरप्यनेन तावन्तमेव कालं स्थातव्यम्, पुनरप्येवमिति नैव[2] विनश्येदिति। तस्मात् क्षणद्वयस्थायित्वेनाप्युत्पत्तौ प्रथमक्षणवद् द्वितीयक्षणेऽपि[3] क्षणद्वयस्थायित्वात् पुनरपरं क्षणद्वयमवतिष्ठेत। एवं तृतीयेऽपि क्षणे तत्स्वभावत्वान्नैव विनश्यतीति।'

स्यादेतत्, स्थावरमेव तद्वस्तु स्वहेतोर्जातम्, बलेन विरोधकेन[4] मुद्गरादिना विनाश्यत[5] इति? तदसत्, कथं पुनरेतद्युज्यते,[6] न च तद्विनश्यति स्थावरत्वात्, विनाशश्च तस्य विरोधिना बलेन क्रियत इति? न ह्येतत्सम्भवति जीवति देवदत्तो मरणं चास्य भवतीति।

अथ विनश्यति, कथं तर्ह्यविनश्वरं[7] तद्वस्तु स्वहेतोर्जातम् ? न हि म्रियते चामरणधर्मा चेति युज्यते वक्तुम्। तस्मादनश्वरत्वे कदाचिदपि नाशायोगात् , दृष्टत्वाच्च नाशस्य, नश्वरमेव तद्वस्तु स्वहेतोरुपजात इत्यङ्गीकुर्मः[8]। तस्मादुत्पन्नमात्रमेव विनश्यति। तथा च क्षणक्षयित्वं सिद्धं भवति। प्रयोगः पुनरेवं

1 ० सन्निधानेऽप्येष एव तस्य-क०।
2 ० स्थाव्यमिति नैव-क०।
3 ० द्वितीयेऽपि क्षणए-क०।
4 ० परं बलेन विरोधकेन-क०।
5 ०एवेति-भो०।
6 ० पुनरेतद्योक्ष्यते-क०।
7 ० तर्हि कथमविनश्वरं-क०।
8 ० स्वहेतोरुपजातमङ्गीकर्त्तव्यम्-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

कर्तव्यः—यद्यत् विनश्वरस्वरूपं[1] तत्तदनन्तरानवस्थायि यथा अन्त्यक्षणवर्तिघटस्य स्वरूपम्। विनश्वररूपं च रूपादिकमुदयकाल इति स्वभावहेतुः।

निर्विशेषणस्वभावहेतोः प्रयोगः

यदि क्षणक्षयिणो भावाः, कथं तर्हि स एवायमिति प्रत्यभिज्ञानं[2] स्यात् ? उच्यते—निरन्तरसदृशापरापरोत्पादादविद्यानुबन्धाच्च पूर्वक्षणविनाशकाल एव तत्सदृशं क्षणान्तरमुदयते। तेनाकारेण वैलक्षण्यस्याभावाद् भावेन चाव्यवधानात् भेदेऽपि[3] स एवायमित्यभेदाध्यवसायप्रत्ययः[4] पृथग्जनानां प्रसूयते। अत्यन्तभिन्नेष्वपि च लूनपुनर्जातकुशकेशादिष्वपि[5] दृष्ट एव स[6] एवायमिति प्रत्ययः। तथेहापि किं न सम्भाव्यते? तस्मात्सर्वं संस्कृतं क्षणिकमिति सिद्धमेवैतत् निर्विशेषणस्य स्वभावहेतोरयं प्रयोग इति[7] ॥

तथाऽपरोऽपि निर्विशेषणप्रयोगः—यत्सत् तत्सर्वमनित्यं, यथा घटः[8]। सन्तश्चामी प्रमाणप्रतीताः[9]। तथाऽपरोऽपि वेदस्य[10] पौरुषयत्वसाधनाय स्वभावहेतुः। यद्वाक्यं[11] तत्पौरुषेयं[12], यथा रथ्यापुरुष[13]वाक्यम्। वाक्यं चेदम्—

---

1 ० यद्विनश्वरस्वरूपं–क०।
2 ० प्रत्यभिज्ञा–क०।
3 ० तेनाकारविलक्षणत्वाभावादभावेननाव्यवधानाच्चात्यन्तोच्छेदेऽपि–क०।
4 ० भेदाध्यवसायी प्रत्ययः–क०।
5 कुशकाशकेशादिष्वपि–भो०। द्रष्टव्यः प्र0 वा0 भा0 पृ0 १४४, ३, अत्रापि सदृशापरोत्पत्तिविप्रलब्धो लूनपुनर्जातकेशनखादिवत्। र0 की0 नि0 पृ0 ९०, १४–१६, न च प्रत्यभिज्ञानादेवैकत्वसिद्धिः, तत्पौरुषस्य लूनपुनर्जातकेशकुशकदलीस्तम्बादौ निर्दलनात्। विस्तरेण च प्रत्यभिज्ञादूषणमस्मभिः स्थिरसिद्धिदूषणे प्रतिपादितमिति तत एवावधार्यम्।
6 ० लूनापुनरुत्पन्नकुशकेशादिषु दृष्ट एवायं–क०।
7 प्रमाणवार्तिकम् १/१८६, उपाधिभेदापेक्षो वा स्वभावः केवलोऽथ वा। उच्यते साध्यसिद्ध्यर्थं नाशे कार्यत्वसत्त्ववत्॥
8 न्यायबिन्दुः ३/११
9 ०प्रमाणप्रतीतः पदार्थाः–क०।
10 ० वेदवाक्यस्य–क०।
11 ०यद् यद्–भो०।
12 ०तत् तत्–भो०।
13 ०रथ्यपुरुष–भो0।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

'अग्निहोत्रं जुहुयात्स्वर्गकाम'[1] इति।

सविशेषणस्वभावहेतोः प्रयोगः

सविशेषणप्रयोगो यथा—यद्यदुत्पत्तिमत् तत्सर्वमनित्यं, यथा घटः[2]।[3] उत्पत्तिमांश्च शब्दः[4]। अनुत्पन्नेभ्यो व्यावृत्तो भाव उत्पन्न उच्यते। यदा सैव व्यावृत्ति-र्व्यावृत्त्यन्तरव्यवच्छेदेन व्यतिरिक्तोच्यते भावस्योत्पत्तिरिति तदा कल्पितेन भेदेन[5] स्वभावभूतधर्मेण विशिष्टः स्वभावो हेतुः।[6]

भिन्नविशेषणस्वभावहेतोः प्रयोगः

तथा भिन्नविशेषणस्य प्रयोगः—यत्कृतकं तदनित्यं यथा घटः, कृतकश्च शब्दः[7]।

ननु चित्रगुरिति भिन्नविशेषणस्य प्रयोगः, यथा चात्र चित्रगोशब्दे[8] भिन्न-विशेषणवाचकोऽस्ति न तथा कृतकशब्दे भिन्नविशेषणवाचकं किमप्यस्ति। तत्कथं भिन्नविशेषणस्योदाहरणमिति चेद्? उच्यते[9]—अपेक्षितपरव्यापारो हि स्वभावनिष्पत्तौ

---

1 प्र0 वा0 भा0 द्रष्टव्यः पृ० ५३०, २५-२६, तत्वसङ्ग्रहः पृ० ५३५ ।

2 यदुत्पत्तिमत्-भो०। न्यायबिन्दुः ३/१०

3 न्यायबिन्दुः ३/९, यत् सत् तत् सर्वमनित्यम् यथा घटादिरिति शुद्धस्य स्वभावहेतोः प्रयोगः। न्याय0 बि0 टी0 पृ0 १५६, ८-१३, यत्। सदिति सत्त्वमनूद्य तत् सर्वमनित्यमित्यनित्यत्वं विधीयते। सर्वग्रहणं च नियमार्थम्। सर्वमनित्यम्। यत् सत् न किञ्चिन्नानित्यम्। तदनित्यमेव। अनित्यत्वादन्यत्र नित्यत्वे सत्त्वं नास्तीत्येवं सत्त्वमनित्यत्वे साध्ये नियतं ख्यापितं भवति। तथा च सति व्याप्तिप्रदर्शनवाक्यमिदम् । यथा घटादिरिति व्याप्तिसाधकस्य प्रमाणस्य विषयकथनमेतत्। शुद्धस्यति निर्विशेषणस्य स्वभावस्य प्रयोगः।

4 न्यायबिन्दुः ३/१३

5 ० कल्पितभेदेन-क०।

6 ० नन्वसत्त्वव्यावृत्त्या सन्नुच्यते। व्यावृत्त्यन्तरव्यवच्छेदेन च व्यतिरिक्तमिव सत्त्वमुच्यते। अतस्तदपि स्वभूतधर्मभेदेन स्वभावोदाहरणं प्राप्तम्। अनुत्पन्नव्यवच्छेदेन पुनरुत्पत्तिः सतो विशेषणम्-क०।

7 न्यायबिन्दुः ३/२४, २, अत्यनित्यत्वे नास्त्येव सत्त्वमुत्पत्तिमत्त्वं कृतकत्वं वा। संश्च शब्द उत्पत्तिमान् कृतको वेति स्वभावहेतोः प्रयोगः।

8 ० चित्रगोशब्दो-क०।

9 ० भिन्नविशेषणस्योदाहरणम्-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

भावः कृतकः इत्युच्यते[1]। ततः कृतकशब्दः परव्यापारसापेक्षं स्वभावं प्रकृत्यैव वदन् भिन्नविशेषणमेवाह ॥

प्रयुक्तभिन्नविशेषणस्वभावहेतोः प्रयोगः

प्रयुक्तभिन्नविशेषणस्य स्वभावस्य प्रयोगः—यः प्रत्ययभेदभेदी स कृतकः, यथा धूमः, प्रत्ययभेदभेदी च शब्दः[2]। प्रत्ययः कारणं,[3] तस्य भेदस्तेन भेत्तुं शीलं यस्य स प्रत्ययभेदभेदी। कारणमहत्त्वेन महत्त्वं कारणाल्पत्वेनाल्पत्वं यस्येत्यर्थः। प्रत्ययभेदभेदिशब्दस्य[4] भिन्नविशेषणवाचकस्यात्र प्रयुक्तत्वात् प्रयुक्तभिन्न-विशेषणोऽयम्। स्वभावहेतोः नानाप्रभेददर्शनं च[5] व्यामोहनिवृत्तये धर्मभेदकल्पनयापि स्वभावहेतुरेव प्रयुज्यत इति प्रतिपादयितुम्।[6]

स्वभावहेतोर्वैधर्म्यवत्प्रयोगनिरूपणम्

स्वभावहेतोर्वैधर्म्यवान् प्रयोगो यथा—यद्यदाऽनन्तरानवस्थायि न भवति न तत्तदा विनश्वररूपं, यथाऽऽकाशम्। विनश्वररूपं च रूपादिकमुदयकाले। व्यतिरेकप्रयोगे साधनाभावेन साध्याभावस्य[7] व्याप्तत्वात् साध्याभावः साधनाभावे नियतो भवतीति बोद्धव्यम्। तथाऽपरोऽपि वैधर्म्यवान् प्रयोगः—[8]यत्र क्षणिकत्वं नास्ति तत्र[9] सत्त्वमपि नास्ति, यथा गगनारविन्दे। संश्च शब्दः। तथा यत्रानित्यत्वं निवृत्तं तत्रोत्पत्तिमत्त्वमपि, यथा कूर्मरोम्णि। उत्पत्तिमांश्च शब्दः। यत्रानित्यत्वं निवृत्तं तत्र कृतकमपि, यथा शशशृङ्गे। कृतकश्च शब्दः। यत्र कृतकत्वं नास्ति तत्र प्रत्ययभेदभेदित्वमपि नास्ति, यथा गगने। प्रत्ययभेदभेदी च शब्द[10] इति ॥

---

1 न्यायबिन्दुः ३/१२
2 न्यायबिन्दुः ३/१३, एवं प्रत्ययभेदभेदित्वादयोऽपि द्रष्टव्याः।
3 ० यथा धूमः प्रत्ययं कारणं–क०।
4 ० प्रत्ययभेदशब्दस्य–क०।
5 ० स्वभावहेतुप्रदर्शनं च–क०।
6 ० प्रतिपादितम्–क०।
7 ० साध्याभावो–क०।
8 यत्र यत्र–भो०।
9 तत्र तत्र–भो०।
10 न्यायबिन्दुः ३/११

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

कार्यहेतोः साधर्म्यवद्वैधर्म्यवत्प्रयोगनिरूपणम्

कार्यहेतोः साधर्म्यवान् प्रयोगो यथा[1]—यत्र यत्र धूमस्तत्र तत्राग्निः, यथा महानसे, धूमश्चात्र। कार्यहेतुरपि प्रत्यक्षानुपलम्भाभ्यां सिद्ध एव कार्यकारणभावे सति कारणे साध्ये प्रयोक्तव्यः। वैधर्म्यप्रयोगो यथा असत्यग्नौ न भवत्येव धूमः यथा—महाह्रदे। अस्ति चेह धूम[2] इति।

अनुपलब्धेस्साधर्म्यवद् प्रयोगः

अनुपलब्धेः साधर्म्यवान् प्रयोगोऽवयविनिराकरणाय यथा—यद्यत्रोपलब्धि-लक्षणप्राप्तं सन्नोपलभ्यते तत्तत्रासद्व्यवहारयोग्यम्, यथा नरशिरसि शृङ्गम्। नोपलभ्यते चात्रोपलब्धिलक्षणप्राप्तः पराभिमतोऽवयवी घटशब्दवाच्येषु कपालेषु[3]।

वैधर्म्यवत्प्रयोगनिरु पणम्

अनुपलब्धेर्वैधर्म्यवान् प्रयोगो यथा[4]—यत्सदुपलब्धिलक्षणप्राप्तं तदुपलभ्यत एव, यथा नीलादिविशेषः[5]। नेह[6] उपलब्धिलक्षणप्राप्तस्य सत उपलब्धिर्घटस्येति[7]।

साध्यसाधनयोर्व्याप्तिः

सर्वत्र साधर्म्यवति साधनवाक्ये साध्येन साधनं व्याप्तम्। वैधर्म्यवति [पुनः] साधनवाक्ये साधनाभावेन साध्याभावो व्याप्त इति प्रतिपत्तव्यम्। साधनस्य च साध्ये

---

1 ० साधर्म्यवान्प्रयोगो यथा-अवयविनिराकरणाय-क०।

2 न्यायबिन्दुः ३/२१, ४, कार्यहेतो—प्रयोगः यत्र धूमस्तत्राग्निः। यथा महानसादौ अस्ति चेह धूम इति।

3 ० पराभिमतोऽवयवी कपालेषु-क०। न्यायबिन्दुः २/९, पृ० १५४, १, यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते सोऽसद्व्यवहारविषयः सिद्धः। यथाऽन्यः कश्चिद् दृष्टः शशविषाणादिःनोपलभ्यते च क्वचिद् प्रदेशविशेष उपलब्धिलक्षणप्राप्तो घट इति।

4 ० वैधर्म्यवान् यथा-क०।

5 ०दृश्यत्वेनाभिमतनीलादिविशेषः-भो०।

6 ० न चैवमिह प्रदेशविशेषे-क०।

7 न्यायबिन्दुः ३/२३,वैधर्म्यवतः प्रयोगः यत् सदुपलब्धिलक्षणप्राप्तं तदुपलभ्यत एव। यथा नीलादिविशेषः। न चैवमिहोपलब्धिलक्षणप्राप्तस्य सता उपलब्धिर्घटस्येत्यनुपब्धिप्रयोगः।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नियतत्वकथनं साध्याभावस्य साधनाभावे नियतत्वकथनं नाम व्याप्तिरभिधीयते। ततः प्रमाणेन व्याप्तिसिद्धौ सत्यां नेदं क्वापि शङ्कनीयं साधनं च स्यात्, साध्यं च तत्र धर्मिणि न स्यादिति[1]।

परांङ्गीकृतेश्वरसाधकानुमानस्य निरसनम्

यत्र प्रमाणेन सर्वोपसंहारवती व्याप्तिरेव न सिद्धा, तत्र शङ्काप्रसरोऽनिवार्यः। यथेश्वरसिद्धौ कार्यत्वानुमाने[2]। तथा हि तेषां साधनोपन्यासः। इहान्यः सर्वज्ञो भगवान् भवतु वा मा भूत्,[3] ईश्वरः पुनस्सर्वज्ञः शक्यते साधयितुम्। तथा हि, लोके त्रयः[4] खलु भावाः केचिन्निश्चितकर्तृकाः, यथा घटादयः[5]। केचिन्निश्चित-कर्तृनिवृत्तयः, यथा व्योमादयः[6]। अन्ये पुनः सन्दिग्धकर्तृकाः, यथा क्षित्यादयः[7]। न पुनरेतेभ्योऽन्यः प्रकारोऽस्ति। तत्र ये दृश्यमानोत्पत्तयो वनस्पत्यादयो ये च चिरोत्पन्ना विश्वम्भरादयः ते सर्वे सन्दिग्धकर्तृत्वेन व्यवतिष्ठमाना बुद्धिमत्कर्तृकाः[8] कार्यत्वात्, घटादिवत्।[9] नायमसिद्धो हेतुः, कार्यत्वस्य सर्वेषां प्रमाणसिद्धत्वात्। नापि विरुद्धः, सपक्षे भावात्। न चानैकान्तः, साध्यविपर्यये बाधकप्रमाणसद्भावात्। तथाहि—कार्यं तावत् बुद्धिमतः कुम्भकारादुपजायमानं भूयोदर्शनसहायेन मानस[10]प्रत्यक्षेणोपलब्धम्।

तद्यदि बुद्धिमन्तरेणापि स्यात् तदानीं बुद्धिमतः सकाशात्कदाचिदपि नोपजायेत। कारणाभावे कार्यस्य[11] सकृदप्युत्पादायोगात्। तस्मान्नेदं क्वापि शङ्कनीयं

---

1 ० भवतीति-क०।
2 कार्यत्वसाधने-भो०।
3 ० भवतु मा वाभूत भगवान्पुनरीश्वरः शक्यते सर्वज्ञः-क०।
4 नास्ति-भो० तथा हि त्रयः भावा भवन्ति-क०।
5 र० की० नि० पृ० ३२, यत्कार्यं तद्बुद्धिमद्धेतुकम् यथा घटः।
6 र० की० नि० पृ० ३४, २८-३०, एतेन यदुक्तं कणिकायां यदि कुलालादीनां कतिपयोपकरणादिज्ञानं, न समस्तोपकरणादिज्ञता, तर्हि तेनैव निर्देशनेन ईश्वरस्य।
7 र० की० नि० पृ० ४४, ३-५, त्रिविधो हि भावराशिः। सन्दिग्धकर्तृको यथा वृक्षादिः। प्रसिद्धकतृको यथा घटादिः। अकतृको यथा आकाशादिः।
8 बुद्धिमत्पूर्वकाः-भो०।
9 ० कार्यत्वात्कुम्भादिवत्-क०।
10 प्रत्यक्षेणोपलब्धम्-भो० मानसेन-क०।
11 ० अकारणात्कार्यस्य-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

कार्यं च स्यात् न बुद्धिमद्धेतुकमिति। अत्रेदमभिधीयते—साधनं खलु सर्वत्र साध्यसाधनयोः सर्वोपसंहरेण प्रमाणेन व्याप्तौ सिद्धायां साध्यं गमयेदिति सर्ववादिसम्मतम्। तत्र[1] यदि दृश्यशरीरविशिष्टेन बुद्धिमता व्याप्तिर्गृह्यते तदा तथाभूतसाध्यमन्तरेणापि जायमाने तृणादौ कार्यत्वस्य दर्शनात् प्रमेयत्वादिवत् साधारणानैकान्तिकोऽयं हेतुः। तृणादयः पक्षीकृता इत्यपि न वक्तव्यम्।[2] न हि व्यभिचारविषय एव पक्षो भवितुमर्हति—

'सन्दिग्धे हेतुवचनात् व्यस्तो[3] हेतोरनाश्रय'[4] इति न्यायात्[5]।

अथाशक्यारोहणेऽपि पर्वते दहनमन्तरेण च धूमदर्शनात्, एवं[6] धूमेऽपि व्यभिचारो वक्तुं सुलभ एव? तन्न। अशक्यारोहणत्वेन पर्वते दहनस्य द्रष्टुमशक्यत्वात् युक्तं तत्र सन्दिग्धविषयत्वम्। प्रस्तुते तु दृश्यशरीरविशिष्टेन[7] बुद्धिमंता व्याप्तौ गृह्यमाणायां दृश्यानुपलम्भेन बुद्धिमतो बाधो भवतीति युक्तम्[8]। अथ दृश्यशरीरेण[9] बुद्धिमन्मात्रेण वा व्यासिरवगम्यते तदा अदृश्यस्य बुद्धिमन्मात्रस्य[10] वा साध्यस्य दृश्यानुपलम्भेन व्यतिरेकासिद्धेः सन्दिग्धविपक्षव्यावृत्तिकोऽयं हेतुः[11]।

---

1 अत्र–भो०।

2 र० की० नि० पृ० ४४, ३१–३४, किं दृश्यशरीरोपाधिना बुद्धिमन्मात्रेण व्याप्तिः गृह्यते, आहोस्वित् दृश्यशरीरोपाधिविधुरेण दृश्यादृश्यसाधारणेनेति विकल्पौ। यद्याद्यः पक्षः, तदा तथाभूतसाध्यमन्तरेणाप्युत्पद्यमाने विटपादौ कार्यत्वदर्शनात् प्रेमेयत्वादिवत् साधारणानैकान्तिको हेतुः।

3 ०व्यक्तो–मूले०।

4 प्रमाणवार्तिकम् ४/९१

5 र० की० नि० पृ० ४४, ३–१२, ननु वृक्षादयः पक्षीकृताः। कथं तैर्व्यभिचारः। त्रिविधो हि भावराशिः। ......यदाह—न साध्येनैव व्यभिचार इति। न हि व्यभिचारविषय एव पक्षे भवितुमर्हति, सन्दिग्धे हेतुवचनाद् व्यस्तो होतोरनाश्रयः इति न्यायात्। व्यभिचारषियता च दृश्यशरीरोपाधिर्बुद्धिमन्मात्रस्य तृणाद्युत्पतौ दृश्यानुपलम्भेन प्रतिक्षिप्तत्वात्।

6 ० दहनमन्तरेण धूमदर्शनादेवं–क०।

7 दृश्यविशिष्टेन–भो०।

8 नास्ति–भो०।

9 ० अथादृश्यशरीरेण–क०।

10 नास्ति–भो०।

11 र० की० नि० पृ० ४४, १४–१९, अथ व्यभिचारचमत्कारास्त्रिविधभावराशिव्यवस्थापनार्थं च विटपादौ प्रत्यक्षप्रतिक्षिप्तेन दृश्यादृश्यसाधारणेन बुद्धिमन्मात्रेण व्याप्तिरवगम्यत इति द्वितीयः सङ्कल्पः। तदा विटपादौ बुद्धिमन्मात्रस्य संभाव्यमानत्वात् न साधारणानैकान्तिकतां ब्रूमः। किं

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

साध्याभावप्रयुक्तस्य साधनाभावस्य [[1]काशदाव] सिद्धत्वेन व्याप्तेरभावात्। तथा चोक्तम् ज्ञानश्रीमित्रपादैः।

कार्यत्वस्य विपक्षवृत्तिहतये सम्भाव्यतेऽतीन्द्रियः ।
कर्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिध्यति ॥
दृश्योऽथ व्यतिरेकसिद्धिमनसा कर्ता समाश्रीयते ।
तत्त्योगोऽपि तदा[2] तृणादिकमिति व्यक्तं विपक्षेक्षणम्[3] ॥

त्रिलोचनाभ्युपगतस्य वह्निधूमयोः स्वाभावविक सम्बन्धवादस्य निरसनम्

यच्च त्रिलोचनेनोक्तम्—

'यथा स्वाभाविकः सम्बन्धो धूमादीनां वह्न्यादिभिस्सह तथा कार्यत्वस्य बुद्धिमता सार्धम्, तदुपाधेरनुपलभ्यमानत्वात्, क्वचिद्व्यभिचारस्यादर्शनात्'[4] इति।

तन्न युक्तम्। यतोऽर्थान्तरं किञ्चिदपेक्षणीयमुपाधिशब्देनाभिधीयते। न चार्थान्तरमवश्यं दृश्यं स्यात्। अदृश्यमपि देशकालस्वभावविप्रकृष्टं सम्भाव्यते। अतो धूमस्य दहनेन सह सम्बन्धे भविष्यत्युपाधिः। न चोपलभ्यत इति कथमदर्शनमात्रेण

तर्हि व्याप्तिग्रहणकाले दृश्यादृश्यसाधारणस्य बुद्धिमन्मात्रस्य साध्यस्यादृश्यतया दृश्यानुपम्भेन व्यतिरेकासिद्धेर्व्याप्तिरभावात् सन्दिग्धव्यावृत्तिकत्वमाचक्ष्महे।

1 नास्ति 'आकाशादौ'-भो०।

2 ०तद्योगेन विना- पाठान्तरम्।

3 ज्ञानश्रीमित्रनिबन्धावलिः पृ० २८५
कार्यत्वस्य विपक्षवृत्तिहतये सम्भाव्यतेऽतीन्द्रियः
कर्त्ता चेद्व्यतिरेकसिद्धिविधुरा व्याप्तिः कथं सिध्यति।
बाधा त्वाहितहेतुमात्रनियतिर्भेदन न व्याप्तये
नाप्यर्थो व्यभिचारगोचरचरः पक्षीक्रियायां क्षमः ॥ इति पाठान्तरम् ॥

4 र० की० नि० पृ० ४७, ४-७, तथा हि स्वाभाविकस्तु धूमादीनां वह्न्यादिभिः सम्बन्धः, तदुपाधेरनुपलभ्यमानत्वात्। क्वचिद् व्याभिचारस्यादर्शनादिति त्वयैवास्य लक्षणमुक्तम्। एतच्चासिद्धम्। यतः उपाधिशब्देन स्वतोऽर्थान्तरमेवापेक्षणीयमभिधातव्यम्। न चार्थान्तरं दृश्यतानियतम् अदृश्यस्यापि देशकालस्वभावविप्रकृष्टस्य संभवात्। ततश्च धूमस्यापि हुताशेन सह सम्बन्धे स्यादुपाधिः न चोपलभ्यत इति कथमदर्शनान्नास्त्येव यतः स्वाभाविक-सम्बन्धासिद्धिः।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नास्त्येवेत्युच्यते।[1] यदप्युक्तं व्यभिचारस्यादर्शनादिति साधनं, तदपि सन्दिग्धासिद्धम्। प्रत्ययान्तरवैकल्येनाहत्य व्यभिचारस्यादर्शनेऽपि सर्वत्र निषेद्धुमशक्यत्वात्[2]। न चैतावता प्रामणिकलोकयात्रातिक्रमः। प्रामाणिकैरेव साधकबाधकप्रमाणाभावे संशयस्य विहितत्वात्। न चैवं संशयेन सर्वत्रप्रवृत्तिप्रसङ्गः,[3] प्रमाणादर्थसन्देहाच्च प्रवृत्तेरुपपत्तेः[4]। यदप्युक्तम्—

> 'यथाऽन्यत्वाविशेषेऽपि बौद्धानां किञ्चिदेव वस्तु कार्यं स्यात्, किञ्चिदेव कारणं, न सर्वं, तथा ममाप्यन्यत्वाविशेषेऽपि किञ्चिदेव धूमादिकं वस्तु स्वाभाविकसम्बन्धेन सम्बद्धं न सर्वम्'[5] इति।

तन्न युक्तम्। यथा धूमाख्यं वस्तु दहनायत्तमिति प्रमाणसिद्धं तथा किं स्वाभाविकसम्बन्धोऽपि प्रमाणसिद्धः, येनैवमुच्यते? किञ्च स्वाभाविकसम्बन्ध इति कोऽर्थः ? किं स्वतो भूतः, स्वहेतोर्वा भूतः अहेतुको वा इति त्रयो विकल्पाः। तत्र न तावदाद्यः पक्षः, स्वात्मनि क्रियाविरोधात्।[6] नापि द्वितीयः, तदुत्पत्तिसम्बन्धस्वीकारप्रसङ्गात्। अथाहेतुकः, तदा देशकालस्वभाव-नियमाभावादतीवासङ्गतः[7] स्वाभाविकसम्बन्धवादः[8]।

---

1 ० नास्त्येवोच्यते-क०।

2 र० की० नि० पृ० ४७, १४-१६, क्वचिद् व्यभिचारस्यादर्शनादिति तु यदुक्तं तत्प्रयुक्तमेव। अदृश्यस्याप्युपाधेः संभाव्यमानत्वात्। व्यभिचारस्य च प्रत्ययान्तरवैकल्येनाहत्यादर्शनेऽपि निषेद्धुमशक्यत्वात्।

3 ० सर्वत्राप्रवृत्तिप्रसङ्गप्रमाणादर्थसंशयाच्च-क०।

4 र० की० नि० पृ० ४७, १८-१९, न चैतावता प्रामाणिकलोकयात्रातिक्रमः। प्रामाणिकैरेव साधकबाधकप्रमाणाभावे न्यायप्राप्तस्य संशयस्य विहित्वात्। न च सर्वत्राप्रवृत्तिप्रसङ्गः, प्रमाणादर्थसंशयाच्च प्रवृत्तेरुपपत्तेः। न चानर्थसन्देहः सर्वत्र कर्तुं शक्यते, क्वचिदर्थोन्मुखतया एव दर्शनात्।।

5 द्रष्टव्यः न्याय० वा० ता० पृ० १३९, ११-१४, र० की० नि० पृ० ४७, २२-२४, अथान्यच्चेदन्यस्य कार्यं कस्मात् सर्वं सर्वस्मान्न भवति, अन्यत्वाविशेषात्। अहेतुकत्वे तु देशकालस्वभावनियमाभावप्रसङ्गादित्यसङ्गतः स्वाभाविकः संबन्धः। यच्चान्यत्वाविशेषेऽपि किञ्चिदेव कारणं कार्यं च किञ्चिदिति स्वभावो यथा न पर्यनुयोज्यस्तथैव स्वभावाननयो-गोऽकार्यकारणभूतानामपि स्वभावप्रतिबन्धे तुल्य एवेति।

6 ० स्वात्मनिकारित्वविरोधात्-क०।

7 ०तीवासङ्गः-क०।

8 र० की० नि० पृ० ४८, ४-७, किं च स्वाभाविकसम्बन्ध इति कोऽर्थः। किं स्वतो भूतः

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

किञ्च साधर्म्येण वैधर्म्येण वा दृष्टान्तमात्रमस्तीति[1] न[2] व्याप्तिसिद्धिः। यदृच्छया मिलितयोरपि[3] करभगदर्भयोस्तथाभावप्रसङ्गात्। तस्मान्निदर्शनं नाम [दृष्टान्त उच्यते। स च] गृहीतविस्मृतप्रतिबन्धसाधक[4]प्रमाणस्मरणद्वारेणैव हेतावुपयुज्यते, न स्वसन्निधिमात्रेण। तथाहि—न तावदाकाशे[5] साध्याभावेन साधनाभावः प्रतीयते। आकाशे हि यथा बुद्धिमत्कारणनिवृत्तिस्तथा अचेतनस्यापि कारणस्य निवृत्तिर्नास्त्येव। तत्कस्याभावप्रयुक्तकार्यत्वाभावः[6] प्रतीयतां, येन साध्याभावप्रयुक्तसाधनाभाव[7]व्यतिरेकः सिध्यतीति। नापि घटे कार्यत्वस्य बुद्धिमदन्वयदर्शनादाकाशेऽपि बुद्धिमदभावादेव[8] कार्यत्वाभावो वक्तुं युज्यते, यस्मादनयोस्तादात्म्यं तदुत्पत्तिरन्यो वा स्वाभाविकादिसम्बन्धः पूर्वप्रमाणेन न प्रसाधितः स्यादित्युक्तम्।[9]

अदर्शनमात्रेण व्यतिरेकोऽसिद्धः

किञ्चादर्शनमात्रेण व्यतिरेको न सिध्यति। तथा हि, विपक्षे हेतुर्नोपलभ्यत इत्यनेन तदुपलम्भकप्रमाण[10]निवृत्तिरुच्यते। प्रमाणं च प्रमेयस्य कार्यम्, 'नाकारणं विषय' इति न्यायात्। न च कार्यनिवृत्तौ कारणनिवृत्तिर्युज्यते,[11] निर्धूमस्यापि वह्नेर्भानात्। यदि पुनः प्रमाणसत्तया प्रमेयसत्ता व्याप्ता स्यात्, तदा युक्तमेवैतत्।

स्वहेतुतो भूतोऽहेतुको वेति त्रयः पक्षाः। न तावदाद्यः पक्षः, स्वात्मनि कारित्रविरोधात्। द्वितीयपक्षे तु तदुत्पत्तिरेव सम्बन्धो मुखान्तरेण स्वीकृत इति न कश्चिद्विवादः।

1 ० दृष्टान्तमात्रमप्यस्तीति-क०।
2 नास्ति-क०।
3 ० यदृच्छामिनितयोरपि-क०।
4 ० गृहीतविस्मृतप्रतिबन्धग्राहक-क०।
5 यस्मादाकाशे-भो०।
6 ० तत्कस्याभावप्रयुक्तः कार्यभावः-क०।
7 ० साध्यभावप्रयुक्तः साधनाभावो-क०।
8 ० बुद्धिमत्तदभावादेव-क०।
9 ० प्रमाणतो न प्रसाधित इत्युक्तम्-क०।
10 ० इत्यनेनोपलम्भकप्रमाण-क०।
11 ० कारणनिवृत्तिरुपलब्धा-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

केवलमियमेव[1] व्याप्तिरसम्भाविनी, सर्वस्य सर्वदर्शित्वप्रसङ्गात्। तस्मान्नादर्शनमात्रेण व्यतिरेक: सिध्यति[2]। यथोक्तम्—

'सर्वाऽदृष्टिश्च सन्दिग्धा स्वाऽदृष्टिर्व्यभिचारिणी ।
भूजलान्तर्गतस्यापि[3] बीजस्यासत्त्वदर्शनात् ॥'[4] इति॥

वाचस्पतिमतनिरसनम्

यदपि वाचस्पतिराह—

'विशेषस्मृत्यपेक्ष एव संशयो भवति ततो यथादर्शनमेव शङ्कितुमुचितम्'[5] इति।

अत्रोच्यते—नायं न्याय: सार्वत्रिक:। तथा चाभ्युपगम्यापि[6] ब्रूम:। तथा हि—[कार्यत्वधूमत्वयो:] तादात्म्यतदुत्पत्तिसम्बन्ध वियोगित्वेन साधारणेन धर्मेण[7] प्रमेयत्वधूमत्वकार्यत्वादीनां तन्मतेनापि[8] सजातीयत्वम्। तत्र प्रमेयत्वस्य

---

1 ० युक्तमेतत्केवलम्। इयमेव-क०।

2 र0 की0 नि0 प0 ४२, २४- , तदेतत् प्रलापमात्रम्। न हि महतापि प्रयत्नेन विपक्षे मृग्यमाणस्य होतोरदर्शनमात्रेण व्यतिरेक: सिध्यति। तथा हि विपक्षे हेतुर्नोपलभ्यत इत्यनेन तदुपलम्भक-प्रमाणनिवृत्तिरुच्यते। प्रमाणं च प्रमेयस्य कार्यम्, नाकारणं नियम इति न्यायात्। न च कार्यनिवृत्तौ कारणवृत्तिरुपलब्धा, निर्धूमस्यापि वह्नेरुपलम्भात्। यदि पुन: प्रमाणसत्तया प्रमेयसत्ता व्याप्ता स्यात्, तदा युक्तमेतत्। केवलमियमेव व्याप्तिरसंभविनी, सर्वस्य सर्वदर्शित्व-प्रसङ्गात्। तन्नादर्शनमात्रेण व्यतिरेकसिद्धि:।

3 ० खलविलान्तर्गतस्य-क०।

4 तत्वसंग्रह: १/१२२, द्रष्टव्य: र0 की0 नि0 प0 ४३ ।
सर्वादृष्टिश्च सन्दिग्धा स्वाऽदृष्टिर्व्यभिचारिणी।
विन्ध्यादिरन्ध्रदूर्वादेरदृष्टावपि सत्त्वत: ॥ इति पाठान्तरम्॥

5 ० यथादर्शनमेवाशङ्कितुमर्चितम्-क०। न्या0 वा0 टी0 १६५, तस्मात् प्रमाणिकलोक-यात्रामनुपालयता यथादर्शनं शङ्कनीयम्। न त्वदृष्टपूर्वमपि। विशेषस्मृत्यपेक्षो हि संशयो, न च स्मृतिरननुभूतचरे भवितुमर्हति। तस्मादुपाधिं प्रयत्नतोऽन्विष्यन्तोऽनुपलभमाना नास्तीत्यवगम्य स्वाभावकत्वं संबन्धस्य निश्चिनुम: इति। र0 की0 नि0 प0 ४२, १६-१८, तस्मात् प्रामाणिकलोकयात्रामनुपालयता यथादर्शनं शङ्कणीयम्, न त्वदृष्टमपि। विशेषस्मृत्यपेक्षो हि संशयो नास्मृतेर्भवति। न च स्मृतिरननुभूतचरे भवति।

6 ० तथाऽप्यम्युपगम्यापि-क०।

7 ० तादात्म्यतदुत्पत्तिसम्बन्धत्यागेन साधारणधर्मेण-क०।

8 ० धूमत्वकार्यत्वानां तन्मतेन-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

व्यभिचारदर्शनमेवान्यत्रापि[1] शङ्कामुपस्थापयतीति यथादर्शनमेवेदमाशङ्कितम्[2]। अतः सन्दिग्धविपक्षव्यावृत्तिकत्वं नाम हेतुदूषणं दुर्वारमेव। एतच्च सद्दूषणमेव। अतो यदनेनोक्त म्—'नायं हेतुदोषः, अतो न परिहर्तव्यः, तस्य[3] चोपन्यासोऽदोषोद्भावनं नाम निग्रहस्थानम्'[4] इति। तदिदानीं स्वमतेनैवानेन वादिना निरनुयोज्यानुयोगलक्षणेन निग्रहस्थानेनात्मा बाधित[5] इत्युपेक्षणीयोऽयं देवानां प्रियः[6]॥

ईश्वरसाधकानुमाने अनुपपत्तिः

ननु यदि दृश्याग्निधूमसामान्ययोरिव दृश्यात्मनोरेव कार्यकारणसामान्ययोः प्रत्यक्षानुलम्भतो व्याप्तिस्तदा सन्तानान्तरानुमानं न स्यात्, परचित्तस्यादृश्यात्मकतया व्याप्तिग्रहणकालेऽनन्तर्भावादिति चेत्? न। स्वसंवेदनं[7] हि तत्र व्याप्तिग्राहकम्। स्वसंवेदनमात्रापेक्षया परचित्तस्यापि दृश्यत्वात्[8]। न चैवं व्यावहारिकेन्द्रियप्रत्यक्षमात्रबुद्धिमन्मात्रं जठरचित्रसाधारणं वह्निमात्रं वा गोचरो युज्यते, [9]येनास्यापि दृश्यता स्यात्। तस्मात् दृश्येनैव वह्निना धूमस्य प्रत्यक्षानुपलम्भाभ्यां व्याप्तिरिति न्यायः[3] ॥

---

1 ०व्यभिचारदर्शनमेव-क०।

2 र० की० नि० पृ ४२, १७-१९, एव च सति तादात्म्यतदुत्पत्तिलक्षणप्रतिबन्धवियोगित्वेन साधारणेन धर्मेण प्रमेयत्वधूमत्वकार्यत्वादीनां त्वन्मतेन सजातीत्वात् प्रमेयत्वव्यभिचारदर्शनमेव शङ्कामुपस्थापयतीति यथादर्शनमेवेदमाशङ्कितम्।

3 ०हेतुदोषोऽतो न परिहर्त्तव्योऽस्य-क०।

4 न्या० सू० अ० ५ आ० २ सू० २३, अनिग्रहे निग्रहस्थानाभियोगो निरनुयोज्यानुयोंगः इति।

5 ० निरनुयोज्यानुयोगलक्षणेनाऽऽत्मा-क०।

6 र० की० नि० पृ० ४३, २२-२७, तदेवं विपक्षेऽदर्शनमात्रेण हेतोर्व्यतिरेकासिद्धेः सन्दिग्धविपक्षव्यावृत्तिकत्वं नाम हेतुदूषणं दुर्वारमेव। अत एवस्योपन्यासोऽदोषोद्भावनं नाम निग्रहस्थानमिति यदनेनावेदितं तदपि सावद्यम्। प्रत्युतास्मिन् हेतोः सद्दूषणे परिहर्तव्ये नायं हेतुदोषोऽतो स्वमतेन निरनुयोज्यानुयोगलक्षणेन निग्रहस्थानेन निगृह्यत इति कृपामर्हति।

7 यतः स्वसंवेदनं-भो०।

8 स्व-परान्तर्गतस्वसंवेदनमात्रापेक्षया परचित्तस्यापि दृश्यमात्रत्वात्, अथवा दृश्यशरीराभेदप्रवृत्तेः परचित्तस्यापि दृश्यत्वमेव-भो०।

9 ततो दृश्येनैवाग्निना धूमस्य व्याप्तिः सिद्धेति स्थितम्। स्व-परसन्तसाधारणस्यादृश्यस्य चित्तमात्रेण प्रत्यक्षेण दृश्यचरादौ व्याप्तिग्रहणास्यासङ्गतत्वादित्यप्युच्यते। बाह्यार्थस्थितौ तु स्व-परसन्ततौ साधारणचित्तमात्रस्य स्वरूपेण अदृश्यत्वेऽपि दृश्यशरीरेण सहैकसामग्री-प्रतिबन्धत्वादभिन्नप्रवृत्तेः स्वपरसन्ततिसाधारणस्य चित्तमात्रस्य कम्पादेः विशेषः प्रतीयते तथा दृश्यात्मनो दृश्यस्य वाऽभिन्नप्रवृत्तेर्वस्तुद्वयस्य अतिविस्पष्टो व्यवहारः प्रत्यक्षेण सिद्धो

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

किञ्च यदि बुद्धिमन्मात्रपूर्वकत्वमनेन साध्यते, तदा सिद्धसाधनतादूषणं साधनस्य। अथ एको नित्यः सर्वज्ञ इत्यादिविशेषणविशिष्टबुद्धिमत्पूर्वकत्वं साध्यते, तदा एवं विशेषणविशिष्टेन साध्येन सह कार्यत्वस्य साधनस्य दृष्टान्तधर्मिणि प्रमाणेन व्याप्तेरसिद्धेरनैकान्तिकत्वम्[1]। अथ सामान्येन व्याप्तिमादाय विशेषस्य पक्षधर्मताबलात् सिद्धिरुच्यते[2]? तन्न युक्तम्। येन साध्यगतेन विशेषणेन विना हेतोर्वृत्तिर्धर्मिणि न घटते, तस्य विशेषस्य पक्षधर्मबलाद्युक्ता सिद्धिः। यथा धूमात् पर्वतदेशवृत्तित्वस्य दहनधर्मस्य, न तु तार्णत्वादीनां विशेषाणाम्। तार्णतामन्तरेणापि[3] पर्वते धूमदर्शनात्[1]। तद्वद् बुद्धिमतोऽपि शरीरादिवृत्तित्वं यदि सिध्यति, सिध्यतु। न पुनरत्यन्तविलक्षणं सर्वज्ञत्वम्[4]। असर्वज्ञत्वेऽपि कार्यत्वस्य सम्भवात्। उपादानाद्यभिज्ञत्वादपि न सर्वज्ञत्वसिद्धिः[5], एकत्वसिद्धौ सिध्येतत्। न

व्याप्तिग्रहणश्च। नैवंविधं अकृतकत्वम् अदृश्यसाधारणस्य चित्तमात्रस्य कारणान्तरानुमानं कर्तुं युक्तम्। तस्मात् प्रत्यक्षातुपलम्भाभ्यां व्याप्तिग्रहणं दृश्ये दृश्येनैवेति न्यायः–भो०। इत्यधिकः पाठः। द्रष्टव्यः र० की० नि० पृ० ४५, १३–२३, ननु यदि दृश्याग्निधूमसामान्योरिव दृश्यात्मनोरेव कार्यकारणसामान्ययोः प्रत्यक्षानुलम्भतो व्याप्तिस्तदा परचित्तानुमानक्षतिः। स्वपरसन्तान-साधारणेन दृश्यादृश्येन चिन्मात्रेण प्रत्यक्षतो दृश्यविषयाद् व्याप्तिग्रहणायोगादित्यपि न वाच्यम्। बाह्यार्थस्थितौ हि स्वपरसन्तानसाधारणस्य चिन्मात्रस्य स्वरूपेणादृश्यत्वेऽपि दृश्यशरीरेण सहैकसामग्रीप्रतिबन्धादविनिर्भागवर्तित्वमस्त्येव। ततो यथा घटविषयं प्रत्यक्षं रूपैकदेशप्रवृत्तमप्यव्यभिचारात् समुदायोपस्थापकम् तथा देहग्राहकमेव प्रत्यक्षं देहाविनिर्भागवर्तिस्वपरसन्तानसाधारणं चिन्मात्रं कम्पादेर्व्यापकमधिगच्छति। तदेवं दृश्यात्मनो दृश्याविनिर्भागवर्तिनो वा पदार्थस्य व्यावहारिकपटुप्रत्यक्षतः सिद्धिर्व्याप्तिग्रहश्च, न तु तथात्वविनाकृतादृश्यसाधारणचिन्मात्रस्येति सन्तानान्तरानुमानमुचितम्। तस्माद् यदि प्रत्यक्षानुपलम्भाभ्यां व्याप्तिग्रहस्तदा दृश्येनैव दृश्यस्येति न्यायः।

1 र० की० नि० पृ० ५४, १३–१५, यदेतत् कार्यत्वं साधनं किमनेन विश्वस्य बुद्धिमन्मात्रपूर्वकत्वं साध्यते। आहोस्विदेकत्वविभुत्वसर्वज्ञत्वनित्यत्वादिगुणविशिष्टबुध्दिमत्पूर्वकत्वम्। प्रथमपक्षे सिद्धसाधनम्। द्वितीये तु व्याप्तेरभावदैकान्तिकता।

2 र० की० नि० पृ० ५४, १६–१७, ननु सामान्येन व्याप्तौ प्रतीतायामपि पक्षधर्मताबलाद् विशेषसिद्धिः। यथाग्नेः पर्वतायोगव्यवच्छेदादिसिद्धिः।

3 वृक्षपत्रोद्भूतधूमदर्शनात्–भो०।

4 र० की० नि० पृ० ५४, २१–२४, सिध्यत्येव पक्षधर्तताबलतो विशेषः। न तु सर्वः। येन हि विना पक्षस्थं साधनं नोपपद्यते स विशेषः सिध्यतु। यथा वह्नेरेव पर्वतवर्तितत्वादिविशेषो नपर्वतवर्ति-शिखाकपालकमनीयः। न च गिरीणां तरूणां कार्यत्वं कर्तुरेकत्वविभुत्वसर्वज्ञत्वादिकमन्तरेण नोपपद्यते, तदितरेष्वपि दर्शनात्।

5 र० की० नि० पृ० ५६, ११, एककर्तुर्न सिद्धौ तु सर्वज्ञत्वं किमाश्रयम्।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

चैकत्वं सिद्धम्[1]। अनेककर्तृपूर्वकत्वेऽपि कार्यत्वस्य सम्भवात्। यथाऽनेककीटिकानिष्पादितः शक्रमूर्धा। अथ शक्रमूर्ध्नोऽपीश्वरपूर्वकत्वं साध्यं, तर्हि घटस्यापीश्वरपूर्वकत्वसिद्धौ कुतो दृष्टान्तत्वम् ? अथ कुम्भकारस्य कर्तृत्वं दृष्टं कथमपाक्रियते ? कीटकादीनां च हेतुत्वं दृष्टं तदपि कथं वार्यते ? नापि बहूनां कारणत्वे विप्रतिपत्तिसम्भावना[2], दृष्टत्वादेवेति। तस्मात् साध्यसाधनयोः सर्वोपसंहारवती व्याप्तिर्दृष्टान्तधर्मिणि प्रमाणेनावश्यं दर्शयितव्येति स्थितम्[3]। किञ्च नित्यैकसर्वज्ञे बुद्धिमति साध्ये विरुद्धोऽप्येषः। अनित्यानेकासर्वज्ञेन बुद्धिमता व्याप्तत्वात् कार्यत्वस्य। तथा हि, साध्यविपर्ययसाधनादिह विरुद्ध उच्यते। अयं च साध्यविपरीतं साध्यतीत्यास्तां तावत् प्रस्तावायातेश्वरदूषणोद्भावनानिबन्धकरणम् ॥

साधर्म्यवैधर्म्यप्रयोगेषु त्रैरूप्यासिद्ध्याशंङ्का तन्निरसनञ्च

ननु साधर्म्यवति साधनवाक्ये अन्वय एवोक्तः न तु व्यतिरेकः। वैधर्म्यवति च व्यतिरेक एवोक्तः, न त्वन्वयः। तत्कथमाभ्यां त्रिरूपं लिङ्गं कथ्यत इति चेत्, नैष दोषः। यस्मात् साधर्म्यवति च साधनवाक्ये[4], उपन्यस्ते सामर्थ्यादेव व्यतिरेकोऽवगम्यते। व्यतिरेकागृहीतौ च साध्याभावेऽपि न साधनाभाव इति विपर्ययः सम्भावयितव्यः। एवं चान्वयस्यैवाभावः स्यात्। सत्यपि साधने साध्याभावादिति सामर्थ्यम्। तथा वैधर्म्यवति साधनवाक्ये उपन्यस्ते सामर्थ्यादेवान्वयोऽवगम्यते, अन्वयगृहीतौ हि साधनं च स्यात् साध्यं च न भवेदिति विपर्ययः सम्भावयितव्यः। एवं च व्यतिरेक एव न भवेत्। साध्याभावेऽपि साधनस्य भावादिति सामर्थ्यम्। तस्मात् द्वावपि प्रयोगौ त्रिरूपलिङ्गप्रकाशकावित्यदोषः[5] ॥

व्यप्तिग्राहक प्रमाणनिरू पणम्

---

1 र० की० नि० पृ० ५५, २९-३०, एकस्य कर्तुरभावे बहूनां व्यावतमनसामित्यादि। तदपि चिन्त्यताम्। बहुभिः करणे युगपत्कार्यानुपत्तिरिति।

2 सन्देहसम्भावना-भो०।

3 र० की० नि० पृ० ४०, १८-१९, इह खलु बुद्धिमत्कार्यमात्रयोः साध्यसाधनयोः सर्वोपसंहारवती व्याप्तिस्तावदवश्यं ग्रहीतव्या।

4 ०साधर्म्यवति वाक्ये-क०।

5 न्यायबिन्दुः ३/२६-२७, न्या० बि० टी० पृ० १६६, १४-१५, ननु च साधर्म्यवति व्यतिरेको नोक्तः। वैधर्म्यवति चान्वयः। तत् कथमेतत् त्रिरूपलिङ्गाख्यानमित्याह।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सम्प्रति साध्यसाधनयोर्व्याप्तिः यत्र धर्मिणि[1] ग्रहीतव्या[1], येन च प्रमाणेन, तदुभयं सुखावबोधार्थं कथ्यते—स्वभावहेतोः सत्त्वलक्षणस्य क्षणिकत्वेन व्याप्तिः साध्यधर्मिण्येव ग्रहीतव्येति केचित्। तेषामन्तर्व्याप्तिपक्षोऽभिमतः[2]। प्रसङ्ग-प्रसङ्गविपर्ययाभ्यां दृष्टान्तधर्मिणि घटादौ व्याप्तिर्ग्रहीतव्येत्यन्ये। तेषां बहिर्व्याप्तिपक्षोऽभिमतः[3]। सत्त्वादन्येषां स्वभावहेतूनां कार्यहेतूनामनुपलम्भहेतूनां च दृष्टान्त एव व्याप्तिर्ग्रहीतव्या। तत्र शिंशपात्वस्य वृक्षत्वव्यवहारे[4], साध्ये दृष्टान्ते प्रत्यक्षानुपलम्भाभ्यां व्याप्तिर्ग्राह्या। सत्त्वक्षणिकत्वयोस्तु प्रसङ्गप्रसङ्गविपर्ययाभ्यां[5] प्रमाणाभ्यां, साध्यविपर्ययबाधकप्रमाणेन वा क्रमयौगपद्यनिवृत्तिलक्षणेन[6] स्वसंवेदनसामर्थ्यसिद्धेर्विकल्पसिद्धेर्वा[3] वस्तुत्वावस्तुत्वाभ्यां सन्दिह्यमाने विपक्षे धर्मिणि, कार्यहेतोर्धूमादेर्वह्न्यादिना महानसादौ दृष्टान्तधर्मिणि त्रिविधप्रत्यक्षानुपलम्भतः[7], पञ्चविधप्रत्यक्षानुपलम्भतो[8] वा व्याप्तिर्ग्रहीतव्या।[9], अनुपलम्भस्य तु[10] असद्व्यवहारयोग्यत्वेन सह[4] व्याप्तिः प्रत्यक्षेणैव।[11], अन्येषां तु स्वभावहेतूनां कार्यहेतूनां वा केषाञ्चित्, यथास्वभावं प्रमाणेनोन्नीय ग्रहीतव्येति ॥[12]

हेत्वाभासनिरूपणम्

व्याप्त्यनिश्चये हेतोरनैकान्तिको दोषः। स च त्रिविधः—असाधारणानैकान्तिकः साधारणानैकान्तिकः[13], सन्दिग्धविपक्षव्यावृत्तिकश्चेति। तत्र

---

1 नास्ति-भो० क०।
2 द्रष्टव्यः आचार्यः रत्नाकरशान्तिपादानां प्रणीतम् अन्तर्व्याप्तिसमर्थनम्।
3 द्रष्टव्यः आचार्यः रत्नकीर्तिपादानां विरचितः क्षणभङ्गसिद्धिः।
4 ०वृक्षव्यवहारयोग्यत्वे-क०।
5 नास्ति-भो०।
6 नास्ति-भो०क्रमयौगपद्यनिवृत्तिलक्षणेन विकल्पे सिद्धे-क०।
7 ०त्रिविधप्रत्यक्षानुपलम्भेन-क०।
8 द्रष्टव्यः आचार्यः ज्ञानश्रीमित्राणां कार्यकारणभावसिद्धिः।
9 ०वा ग्रहीतव्या-क०।
10 ०व्यवहारयोग्यत्ववती-भो०।
11 ०सह प्रत्यक्षेणैव-क०।
12 ०केषाञ्चित्केनचित्प्रमाणेनोन्नीययथास्वं प्रतिपत्तव्येति-क०।
13 ०असाधारणः साधारणः-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

असाधारणानैकान्तिको यथा—सात्मकं जीवच्छरीरम्, प्राणादिमत्त्वात्[1] [2]अपरजीवच्छरीरवत्, घटवत्[5]। अयं हेतुरपरजीवच्छरीरे आत्मना व्याप्त इति न निश्चितः। घटे च विपक्षे आत्मनोऽभावान्निवृत्त इति न निश्चितः। धर्मिणि तु जीवच्छरीरे विद्यत इति असाधारणानैकान्तिक उच्यते। [3]अपरश्चासाधारणो यथा—अनित्यशब्दः श्रावणत्वात्, घटवत्[1], आकाशवदिति। साधारणानैकान्तिको यथा—नित्यः शब्दः प्रमेयत्वात्, घटवत् आकाशवत्।[4], सन्दिग्धविपक्षव्यावृत्तिको यथा—सः श्यामस्तत्पुत्रत्वात्, परिदृश्यमानतत्पुत्रवदिति ॥

यदुक्तं प्राक्, सत्त्वस्य क्षणिकत्वेन सह व्याप्तिः प्रसङ्गप्रसङ्गविपर्ययाभ्यां ग्रहीतव्येति,[5], तत्र कोऽयं प्रसङ्गो नाम ? प्रमाणप्रसिद्धव्याप्तिकेन वाक्येन[6] परस्यानिष्टत्वापादनाय प्रसञ्जनं प्रसङ्गः[7], यथा—सामान्यस्य[8], अनेकवृत्तित्वाभ्युपगमे

---

1 न्यायबिन्दुः ३/९७, यथा सात्मकं जीवच्छरीरं प्राणादिमत्वादिति।

2 नास्ति-भो०।

3 नास्ति-भो०।

4 ०नित्यः शब्दः प्रमेयत्वात्-क०।

5 ०गृह्यत इति-क०।

6 अर्थेन-भो०।

7 यथा—सिद्धादीनामतीतानागतयोरेकस्वरूपत्वेऽभ्युपगते सति अतीतानागतकालोद्भूतस्याप्यर्थक्रियाकारित्वप्रसञ्जनवत्। तथा हि—यद् यस्मिन् अर्थक्रियासमर्थं तत्तत्र कारणमेव, यथा—अन्त्या हि कारणसामग्रीव स्वकार्ये। अयं घटोऽपि अतीतानागतकालिकवस्तुनोऽर्थक्रिया वर्तमानकाल एव कर्तुं समर्थ इति स्वभावहेतुः प्रसज्यते। अकारणस्य तु प्रसङ्गविपर्ययः। यद् यस्मिन् (अर्थक्रियां) न करोति तत्तदा तस्मिन् न समर्थम्, यथा—शाल्यङ्कुरमकुर्वाणस्य कोद्रवस्य शाल्यङ्कुर इव। अयं घटोऽपि अतीतानागतकालिकवस्तुनोऽर्थक्रिया वर्तमानकाले न करोतीति व्यापकानुपलब्धिः। प्रतिबन्धासमर्थस्य क्षणस्य नाश इति प्रसङ्गेन प्रसङ्गविपर्ययेण च प्रमाणाभ्यां सत्त्वे क्षणिकत्वेन व्याप्तिः सिध्यति, साध्यविपर्यये बाधकप्रमाणेन वेति यदुक्तं तत् कथ्यते—यत् क्रमेण वा अक्रमेण वा कार्यं न करोति तत्तावत् कार्यकारित्वासमर्थम्, यथा—गगनारविन्दम्। अक्षणिकस्यापि क्रमेण वा अक्रमेण वा कार्यकारित्वयोः सत्त्वं नास्तीति व्यापकानुपलब्धिर्लाक्षणिका, विपर्यये बाधकप्रमाणेन। अक्षणिकत्वाद् व्यापकक्रमयौगपद्यव्यतिरेकेण निवर्त्यमानम् अर्थक्रियाकारित्वलक्षणं सत्त्वं क्षणेनैवानायासम्। ततः क्षणिकत्वे व्याप्तिरिति सत्त्वे क्षणिकत्वेन व्याप्तिः सिध्यतीति—इतोऽग्रे भोटानुवादे इयान् अधिकः पाठः। द्रष्टव्यः र० की० नि० पृ० ६८, १७-२०, यद् तदा यज्जननव्यवहारयोग्यं तत्तदा तज्जनयत्येव। यथा अन्त्या कारणसामग्री स्वकार्यम्। अतीतानागतक्षणभाविकार्यजननव्यवहारयोग्यश्चायं घटो वर्तमानक्षणभाविकार्यकारणकाले सकलक्रियातिक्रमकालेऽपीति स्वभावहेतुप्रसङ्गः। द्रष्टव्यः र० की० नि० पृ० ६९, ११-१४, यद् यदा यत्र करोति न तत्तदा तत्र समर्थव्यवहारयोग्यम्। यथा शाल्यङ्कुरमकुर्वन् कोद्रवः शाल्यङ्कुरे। न कराति चैष घटो वर्तमानक्षणभाविकार्यकारणकाले

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अनेकत्वप्रसञ्जनम्। तथा हि—यदनेकवृत्ति तदनेकं यथा अनेकभाजनगतं तालफम्। अनेकवृत्ति च सामान्यम्। तस्मादनेनाप्यनेकेन भवितव्यमिति प्रसङ्गः।

प्रसङ्गस्य कार्यम्

अथानेकत्वं नेष्यते, तदाऽनेकवृत्तित्वं च मा स्वीकुर्वीथाः।

ननु यद्येतत् प्रसङ्गाख्यं साधनं प्रमाणं[1], न भवति [त्रैरूप्याभावात्] कथमस्योपन्यास इति, व्याप्तिस्मरणार्थं व्याप्यैकदेशकथनवदिति। यदुक्तम्—

'प्रसङ्गो द्वयसम्बन्धादेकाभावेऽन्यहानये'[2] इति।

अस्यायमर्थः—व्याप्यव्यापकयोः सम्बन्धे सति यदि व्यापकं नेष्यते तदा व्याप्यमपि नेष्यताम्। अथ व्याप्यमिष्यते तदा व्यापकमपीष्यतामिति।[3]

वादिना साधना उपन्यस्ते[4] प्रतिवादिना तत्र दूषणं वक्तव्यमिति न्यायः। असिद्धविरुद्धानैकान्तिकानामन्यतमस्योद्भावनं दूषणम्। यथोक्तम्—

'दूषणानि न्यूनताद्युक्ति'[5] इति।

हेतुदूषणम्

नन्वेषामेवोद्भावनं यदि दूषणं, क्व तर्हि वैयर्थ्यासामर्थ्यातिप्रसङ्गादीनामन्तर्भावः[6]? अत्रैव त्रिषु। तत्र वैयर्थ्यं तावदसिद्धेऽन्तर्भवति। सन्दिग्धसाध्यधर्मो हि

सकलक्रियातिक्रमकाले चातीतनागतक्षणभावि कार्यमिति व्यापकानुपलब्धिर्भिनत्ति समर्थक्षणादसमर्थक्षणम्। द्रष्टव्यः र० की० नि० पृ० ८३, ११, यस्य क्रमाक्रमौ न विद्येते न तस्यार्थक्रियासामर्थ्यम्। यथा शशविषाणस्य। न विद्येते चाक्षणिकस्य क्रमाक्रमाविति व्यापकानुपलम्भः।

8 ०सामान्ये-क०।

1 ०ननु यद्येत्प्रमाणं-क०।

2 ० द्वसम्बन्धादेकापाये‌ऽन्यहानये-क०। प्रमाणवार्त्तिकम् ४/१२ ।

3 ०व्यापकमीष्यतामिति-क०।

4 ०साधने उपन्यस्ते-क०।

5 दूषणान्यून्यताद्युक्तिरिति-क०। न्यायबिन्दुः ३/१३७, न्या० बि० टी० पृ० २५४, ३-४, न्यूनतादीनामुक्तिः। उच्यतेऽनयेत्युक्तिर्वचनम् न्यूनतादेर्वचनम्।

6 वैयर्थ्यातिप्रसङ्गा०-भो० प्रसङ्गानामन्तर्भावः इति-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

हेतुरुच्यते। वैयर्थ्यं तु यत्रोपन्यस्यते तत्र सन्दिग्धसाध्यधर्मकत्वं हेतोर्लक्षणं हेतौ न सम्भवतीति असिद्ध उच्यते।[1] [हेतोर्लक्षणस्यासिद्धेः] यदुक्तम्—

'सन्दिग्धे हेतुवचनात् व्यस्तो[2] हेतोरनाश्रयः'[3] इति।

असामर्थ्यं तु स्वरूपासिद्धावन्तर्भवति। न हि हेतोः सामर्थ्यं[4] नाम हेतुस्वरूपादन्यत्। हेतोरवस्तुत्वप्रसङ्गात्। अतिप्रसङ्गश्चानैकान्तिकेऽन्तर्भाव्यः,[5] साध्यधर्ममतिक्रम्य[6] विपक्षेऽपि प्रसक्तेरिति॥

आत्मनिरसनम्

यत्र तु धर्मिणि साध्यं साधयितुमारब्धं तस्य धर्मिणः प्रमाणबाधित्वे आश्रयासिद्धिर्हेतोर्दूषणम्। यथा सर्वगत आत्मा सर्वत्रोपलभ्यमानगुणत्वात्[7]। तदिह बौद्धस्यात्मैव न सिद्धः, किं पुनरस्य सर्वदेशोपलभ्यमानगुणत्वं सेत्स्यति। तथा हि, तैर्थिकाः खल्वेवं ब्रुवन्ति।[8] शरीरादिवस्तुव्यतिरिक्तं शुभाशुभकर्मकर्तृतत्फलभोक्तृ[9] नित्यव्यापिरूपमात्माख्यं द्रव्यान्तरमस्ति[10]। तेन च यदि नाम विश्वं व्याप्तं तदपि[11] यदुपभोगायतनतया[12] परेण[13] परिगृहीतं जीवच्छरीरं तदेव सात्मकमभिधीयत इति। एतच्चायुक्तम्। आत्मनः सिद्धये प्रमाणाभावात्। न हि प्रत्यक्षेण आत्मा प्रतीयते।

---

1 ०होतोर्लक्षणं नास्तीत्यसिद्ध उच्यते-क०।
2 ०व्यक्तो-मूले०।
3 प्रमाणवार्त्तिकम् ४/९१।
4 ०न हि सामर्थ्यं -क०।
5 ०अतिप्रसङ्गः पुनरवैकान्तिकेऽन्तर्भाव्यः-क०।
6 ०साध्यमर्थमतिक्रम्य-क०।
7 न्यायबिन्दुः ३/६५, धर्म्यसिद्धावप्यसिद्धः—यथा सर्वगत आत्मेति साध्ये सर्वत्रोपलभ्यमानगुणत्वम्।
8 ०वदन्ति-क०।
9 शुभाशुभकर्त्तृतत्फलोपभोक्तृ०-क,-भो०।
10 तत्वसंग्रहः कारिका १७१-१७२, अन्ये पुनरीहात्मानमिच्छादीनां समाश्रयम्। स्वतोऽचिद्रूपमिच्छन्ति नित्यं सर्वगतं तथा। शुभाशुभानां कर्त्तारं कर्मणां तत्फलस्य च। भोक्तारं चेतनायोगाच्चेतनं न स्वरूपतः॥
11 ०तथाऽपि यदुपभोगायतनतया परिगृहीतं-क०।
12 न्यायसूत्रम् १/१/९, तस्य भोगायतनम् शरीरम्।
13 नास्ति-ख, भो०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

चक्षुरादिज्ञानानां रूपादिविषयपञ्चकनियतत्वात्। मानसस्याप्यहंप्रत्ययस्य[1] शरीरादि-विषयत्वात् गौरोऽहं स्थूलोऽहं गच्छाम्यहमित्याद्याकारेण अहं[2] प्रत्यय उत्पद्यते[3]। यदाह अलङ्कारकारः—

अहमित्यपि यज्ज्ञानं तच्छरीरेन्द्रियांशवित्[4] ।
अहं काणस्सुखी गौरः समानाधारवेदनात्[5] ॥

न चास्य शरीरव्यतिरिक्तस्य तद्धर्मो गौरत्वं स्थूलत्वं वा। न च विभोरमूर्त्तस्य मूर्तद्रव्यानुविधायिनी गमनक्रिया[6] युक्तिमती। न चायं[7] माणवके सिंहप्रत्यय इव भाक्तो युक्तः, स्खलद्वृत्तिप्रसङ्गात[8]। नाप्यनुमानेन प्रतीयते, कार्यस्वभावलिङ्गाभावात्। नित्यपरोक्षेण देशकालाकारव्यतिरेकविकलेनात्मना[9] सह कस्यचिदन्वयव्यतिरेकात्मककार्यकारणभावासिद्धेः कार्यलिङ्गायोगात्। धर्मिसत्तायाश्चासिद्धत्वात् स्वभावलिङ्गानुपपत्तेः। न चान्यल्लिङ्गमस्ति[10]। अन्येनापि लिङ्गेन भवता साध्यव्याप्तेन भवितव्यम्। तस्य च सर्वथाऽसिद्धेः, कथं तेन व्याप्तत्वं लिङ्गस्य निश्चीयताम् ? किञ्च,[11] कियमात्मा बोधरूपः, अबोधरूपो वा[12]? यदि बोधरूपो नित्यश्च तदा चक्षुरादिवैफल्यप्रसङ्गो दुर्वारः। अथानित्यो बोधरूपस्तदा[13]

1 ०चक्षुरादिज्ञानानां रूपादिपञ्चविषयनियतत्वान्मानसस्याप्यहं प्रत्ययस्य–क०।

2 ०गच्छाम्यहमित्यादिना कारणेनाहं–क०।

3 तत्वसंग्रहः अन्यैः प्रत्यक्षसिद्धत्वमात्मनः परिकल्पितम्। स्वसंवेद्यो ह्यहङ्कारस्तस्यात्मा विषयो मतः।

4 ०छरीरेन्द्रात्मवित्–क०।

5 प्र0 वा भा0 पृ0 ३६८, कारिका ३/७४४

6 ०गमनादिक्रिया–क०।

7 ०नाप्ययं–क०।

8 तत्वसं0 पं0 पृ0 ११६, ११, ततश्च यदुक्तमुद्द्योतकरप्रभृतिभिः "उपभोगायतने शरीरेऽयमात्मोपचार यथा अनुकूले भृत्ये राजा ब्रूते—य एवाहं स एवायं मे भृत्यः इति, तदपास्तं भवति। यथा हि यद्ययं गौणः स्यात्, तद् स्खलद्वृत्तिर्भवेत्। न हि लोके सिंहमाणवकयोर्मुख्यारोपितयोर्द्वयोरपि सिंहः इत्यस्खलिता बुद्धिर्भवति।

9 ०देशकालव्यतिरेकविकलेन०–क०।

10 द्रष्टव्यः तत्वसंग्रः कारिका २०७–२०९

11 ०अपि च–क०।

12 ०अबोधस्वरूपोऽदृश्यश्च०–भो०।

13 ०बोधरूपस्तदानीं–क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

ज्ञानस्यैवात्मेति नाम कृतम्, न[1] विप्रतिपत्तिः। अथाबोधरूपो दृश्यश्च तदाऽनुपलम्भोऽस्य सत्तां न क्षमत इति निरात्मसिद्धिरनवद्या। तस्मात् सर्वं संस्कृतं वस्तु निरात्मकमिति ॥

स्वरूपासिद्ध्यापि हेत्वभासनिरूपणम्

स्वरूपासिद्ध्याऽप्यसिद्धो हेत्वाभासो भवति। यथा अनित्यश्शब्दः चाक्षुषत्वादिति[2]। ननु व्याप्त्यसिद्धिरपि दूषणम्, तेनापि परेष्टार्थासिद्धेः।[3] तत्किं नोच्यते? अनैकान्तिकदूषणेनैव गतार्थत्वात् पृथङ्नोक्तम्। तथा हि—न स्वलक्षणाभ्यां व्याप्तिर्ग्रहीतुं शक्या।[4] स्वलक्षणस्य देशकालाकारनियतत्वेनाप्यन्यत्रानुगमाभावात्। अपि तु साध्यसाधनसामान्याभ्यामेव व्याप्तिर्ग्रहीतव्या। तत्र च यदि साधनं साध्येन व्याप्तं न प्रतीयते[5] तदा साधनं च स्यात् साध्यं च न स्यादित्यनैकान्तिकमेव भवति।।[6]

अपोहनिरूपणम्, सामान्यनिरसनं च

ननु सामान्यं चेदप्रसिद्धं, तत्कथं साध्यसाधनसामान्याभ्यां सर्वोपसंहारवती व्याप्तिः प्रमाणेन गृह्यते ? नैष दोषः। यतो यादृशं सामान्यं परैः परिकल्प्यते तादृशं प्रमाणेन बाध्यत इति नाभ्युपेयते[7] तत्सौगतैः। न तु[8] व्यवहारप्रसिद्धमन्य-व्यावृत्तिलक्षणमपोहसंज्ञितमपि। ननु कोऽयमपोहो नाम ? यथाध्यवसायं बाह्य एव घटादिरर्थ अपोह इत्यभिधीयते, अपोह्यतेऽस्मादन्यद्विजातीयमिति कृत्वा। यथाप्रतिभासं बुद्ध्याकारो वाऽपोहः,[9] अपोह्यते पृथक् क्रियतेऽस्मिन् बुद्ध्याकारे

1 ०न कापि-क०।
2 न्यायबिन्दुः ३/५८, पृ० १९०, ६, यथा अनित्यः शब्द इति साध्ये चाक्षुत्वमुभयासिद्धम्।
3 ०परेष्टासिद्धेः-क०।
4 ०व्याप्तिर्ग्रहीतव्या-क०।
5 ०प्रतीयेत-क०।
6 ०स्यादित्यनैकान्तिकमेवेति-क०।
7 ०नाभ्युपेयं-क०।
8 व्यवहारप्रसिद्धं सामान्यमन्य०-भो०।
9 ०बुद्ध्याकारोऽपोहः-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

विजातीयमिति कृत्वा। यथातत्त्वं निवृत्तिमात्रं प्रसज्यरूपो वाऽपोहः,[1] अपोहनमपोह इति कृत्वा[2]।

ननु यथाध्यवसायं विधिरेव, तर्हि केवलो विषय[3] इत्यागतम्। न अपोह–विशिष्टो विधिरभिप्रेतः[4]। यत्तु गोप्रतीतौ न गवात्मा अगवात्मेति[5] सामर्थ्यादपोहः पश्चान्निश्चीयत इति विधिवादिनां मतम्। अन्यापोहप्रतिपत्तौ च सामर्थ्यादन्यपोढो गवादिरर्थोऽवधार्यत इति निवृत्त्यपोहवादिनां मतम्[6]। तन्न युक्तम्, व्यवहारकाले प्रथमं वर्तमानस्यापि[7] प्रतीतिक्रमादर्शनात्।[8] न हि विधिं प्रतिपद्य कश्चिदर्थापत्तितः पश्चादपोहमवगच्छति,[9] अपोहं वा प्रतिपद्य पश्चादन्यापोढमवगच्छति। तस्मात् गोप्रतिपत्तिरेव अन्यापोढ[10]प्रतिपत्तिरुच्यते। यद्यपि गोशब्दादुच्चरितादन्यापोढ–शब्दानुल्लेख उक्तः, तथाऽपि[11] नाप्रतिपत्तिरेव विशेषणभूतस्यान्यापोहस्य। अगवापोढ एव वस्तुनि गोशब्दस्य संकेतितत्वात्[12]। यथा नीलोत्पलसंकेतितेन्दीवरशब्दात् उत्पलप्रतीतौ[13] तत्काल एव[14]

---

1 ०प्रसज्यरूपोऽपोहः–क०।

2 र0 की0 नि0 पृ0 ५८, १–४, ननु कोऽयमपोहो नाम। किमिदमन्यस्मादपोह्यते। अस्माद् वान्यदपोह्यते। अस्मिन् वान्यदपोह्यत इति व्युत्पत्त्या विजातिव्यावृत्तं बाह्यमेव विवक्षितम्। बुद्ध्यकारो वा। यदि वा अपोहनमपोह इत्यन्यव्यावृत्तिमात्रम् इति त्रयः पक्षाः।

3 अपोह–भो०।

4 ०ना। अन्यापोहविशिष्टो–क०। र0 की0 नि0 पृ0 ५९, ४–६, अत्राभिधीयते। नास्माभिरपोहशब्देन विधिरेव केवलोऽभिप्रेतः। नाप्यन्यव्यावृत्तिमात्रम्। किन्त्वन्यापोहविशिष्टो विधिः शब्दानामर्थः। ततश्च न प्रत्येकपक्षोपनिपातिदोषानवकाशः।

5 ०गवात्मेति–क०।

6 र0 की0 नि0 पृ0 ५९, ७–९, यत्तु गोः प्रतीतौ न तदात्मापरात्मेति सामर्थ्यादपोहः पश्चान्निश्चीयते इति विधिवादिनां मतम्, अन्यापोहप्रतीतौ वा सामर्थ्यादन्यापोढोऽवधार्यते इति प्रतिषेधवादिनां मतम्।

7 प्रवृत्तस्यापि–भो० प्रवर्त्तमानस्यापि–क०।

8 ०क्रमादर्शनात्–क०।

9 ०पश्चादपोहमधिगच्छति–क०।

10 ०तस्माद्गोप्रतिपत्तिरित्यन्यापोह–क०।

11 ०शब्दानुल्लेखः तथापि–क०।

12 र0 की0 नि0 पृ0 ५९, ९–१३, तदसुन्दरम्। प्राथमिकस्यापि प्रतिपत्तिक्रमादर्शनात्। न हि विधिं प्रतिपद्य कश्चिदर्थापत्तितेः पश्चादपोहमवगच्छति। अपोहं वा प्रतिपद्यान्यापोढम्। तस्माद् गोः प्रतिपत्तिरित्यन्यापोढप्रतिपत्तिरुच्यते। यद्यपि चान्यापोढ एव गोशब्दस्य निवेशितत्वात्।

13 नीलोत्पलप्रतीतौ–भो०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नीलमस्फुरणमनिवार्यं तथा गोशब्दादप्यगवापोढ एव वस्तुनि संकेतितात् गोप्रतीतौ[1] तुल्यकालमेव विशेषणत्वात् अपोहस्य अगवापोह- स्फुरणमनिवार्यम्। यथा च प्रत्यक्षस्य प्रसज्यप्रतिषेधरूपाभावग्रहणमभाव[2] विकल्पोत्पादनशक्तिरेव, तथा विधिविकल्पानामपि तदनुरूपानुष्ठानशक्तिरेवाभाव- ग्रहणमभिधीयते।[3] अन्यथा यदि गोशब्दादर्थप्रतिपत्तिकाले नावगतः परापोहः, कथं तर्हि अन्यपरिहारेण प्रतिपत्ता गवि वर्तताम्।[4] ततो गां बधानेति चोदितोऽश्वानपि बध्नीयादिति[5]। तस्मात् स्थितमेतत्, बाह्यार्थोऽध्यवसायादेव शब्दवाच्ये व्यवस्थाप्यते, न तु स्वलक्षणपरिस्फूर्त्या, प्रत्यक्षवद्देशकालाकारावस्थानियत[6] प्रव्यक्तस्वलक्षणास्फुरणात्[7]। यदाह न्यायपरमेश्वरः—

'शब्देनाव्यापृताक्षस्य बुद्धावप्रतिभासनात्।
अर्थस्य दृष्टाविव'[8] इति ॥

किञ्च स्वलक्षणात्मनि वस्तुनि वाच्ये[9] सर्वात्मना प्रतिपत्तेः विधिनिषेधयोरयोगः। तस्य हि सद्भावे अस्तीति व्यर्थम्, नास्तीत्यसमर्थम्। असद्भावे

---

14 ०तुल्यकाल एव०-भो०।

1 ०गोशब्दादप्यगवापोदे सङ्केतितादेः प्रतीतौ-क०।

2 प्रसज्यरूपाभाव-क०।

3 ग्रहणमुच्यते-क०।

4 प्रवर्त्तताम्-क०।

5 र० की० नि० पृ० ५४, ३-१५, यथा नीलोत्पले निवेशितादिन्दीवरशब्दान्नीलोत्पलप्रतीतौ तत्काल एव नीलिमस्फुरणमनिवार्यं तथा गोशब्दादप्यगवापोढे निवेशिताद् गोप्रतितौ तुल्य-कालमेव विशेषणत्वादगोऽपोहस्फुरणमनिवार्यम्। यथा प्रत्यक्षस्य प्रसृज्यरूपाभावाग्रहणमभाव-विकल्पोत्पादनशक्तिरेव तथा विधिविकल्पानामपि तदनुरूपानुष्ठानदानशक्तिरेवाभाव-ग्रहणमभिधीयते। पर्युदासरूपाभावग्रहणं तु नियतस्वरूपसंवेदनमुभयोरविशिष्टम्। अन्यथा यदि शब्दावर्थप्रतिपत्तिकाले कलितो न परापोहः कथमन्यपरिहारेण प्रवृत्तिः। ततो गां बधानेति चोदितोऽश्वादीनामपि बध्नीयात्।

6 प्रत्यक्षवद्देशकालाकारनियत-क०।

7 र० की० नि० पृ० ६०, २१-२३, तत्र बाह्योऽर्थोध्यवसायादेव शब्दवाच्यो व्यवस्थाप्यते। न स्वलक्षणपरिस्फूर्त्या। प्रत्यक्षवद्देशकालावस्थानियतप्रव्यक्तस्वलक्षणास्फुरणात्।

8 प्रमाणविनिश्चयः तेनग्युर, पृष्ठ १५७ , द्रष्टव्यः- ज्ञानश्रीमित्रनिबन्धावलिः, पृष्ठ २८५ ।

9 स्वलक्षणात्मनि वाच्ये-क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तु नास्तीति व्यर्थम्, अस्तीत्यसमर्थम्। अस्ति चास्त्यादिपदप्रयोगः। तस्मात् परमार्थतो न स्वलक्षणं शब्दैरभिधीयत इति स्थितम्[1] ॥

ननु यथा प्रत्यक्षेण घटस्वरूपे गृहीतेऽपि पश्चात्तत्रैव क्षणिकत्वादिनिश्चयार्थं प्रमाणान्तरं प्रवर्तते, तथा वृक्षशब्देन वृक्षत्वांशे प्रतिपादिते सत्वांशनिश्चयार्थमेव सदादिपदप्रयोगो[2] भविष्यतीति चेत्[3], न। प्रत्यक्षस्यानिश्यात्मकत्वादनभ्यस्त-स्वरूपविषये प्रमाणान्तरं वर्तत इति युक्तम्। विकल्पस्य तु स्वयं निश्यात्मकत्वात्, गृहीते स्वरूपे किं प्रमाणान्तरेण परं[4] ग्रहीतव्यमिति[5] ॥

परपरिकल्पितसामान्यनिरसनम्

यादृशं सामान्यं परैः परिकल्प्यते, अनेकव्यक्तिसमवेतं दृश्यमेकं[6] नित्यं तादृशस्य सत्तासाधकं न किञ्चित्प्रमाणमुपलभामहे। ततः सदिति व्यवस्थापयितुं[7] तत्र युक्तम्। तथा हि—गवादिव्यक्त्यनुभवकाले वर्णसंस्थानाद्यात्मकं व्यक्तिस्वरूपमपहाय नान्यत् किञ्चिदेकमनुयायि प्रत्यक्षे भासते। तादृशस्यानुभवाभावात्। नापि स्वलक्षणानुभवानन्तरमेकाकारपरामर्शप्रत्ययात् अन्यथाऽनुपपत्त्या सामान्यपरिकल्पनं युक्तिसङ्गतम्। व्यक्तिभ्य एव स्वहेतुदत्तशक्तिभ्योऽस्य प्रत्ययस्य परम्परयोत्पत्तेः। भेदेऽपि काश्चिदेव व्यक्तयोऽस्य जननाय समर्थाः, न सर्वाः, इत्यत्र कार्यकारणभावस्य प्रत्यक्षानुपलम्भाभ्यां

---

1 र० की० नि० पृ० ६१, १०–१४, किं च स्वलक्षणात्मनि वस्तुनि वाच्ये सर्वात्मना प्रतिपत्तेः विधिनिषेधयोरयोगः। तस्य हि सद्भावेऽस्तीति व्यर्थम्, नास्तीत्यिसमर्थम्। अस्ति चास्यादिपदप्रयोगः। तस्मात् शाब्दप्रतिभासस्य बाह्यार्थभावाभावसाधारण्यं न तद्विषयतां क्षमते।

2 सत्वांशनिश्चयार्थमस्त्यादिप्रयोगो–क०।

3 र० की० नि० पृ० ६२, ६–७, ननु वृक्षशब्देन वृक्षत्वांशे चोदिते सत्त्वाद्यंशानिश्चय-नार्थमस्त्यादिपदप्रयोग इति चेत्।

4 प्रमाणान्तरेणापरेण–क०।

5 र० की० नि० प० ६२, ८–१०, निरंशत्वेन प्रत्यक्षसमधिगतस्य स्वलक्षणस्य कोऽवकाशः पदान्तेन। धर्मान्तरविधिनिषेधयोः प्रमाणान्तरेण वा। प्रत्यक्षेऽपि प्रमाणान्तरापेक्षा दृष्टेति चेत्। भवतु तस्यानिश्चयात्मकत्वादनभ्यस्तस्वरूपविषये। विकल्पस्तु स्वयं निश्चयात्मको यत्र ग्राही तत्र किमपरेण। अस्ति च शब्दलिङ्गान्तरापेक्षा। ततो न वस्तुस्वरूपग्रहः।

6 दृश्यात्मकं–क०।

7 नास्ति–भो०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

दृष्टस्यातिवर्तयितुमशक्यत्वात्। दृष्टं चेदं सामर्थ्यं भेदाविशेषेऽपि कासाञ्चिदेव व्यक्तीनाम्। यथा ज्वरादिप्रशमने गुडूचीनिम्बादीनाम्। यथोक्तम्—

'एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधने ।
भेदेऽपि नियताः केचित्स्वभावेनेन्द्रियादिवत्'[1] ॥ इति ॥

किञ्च सर्वगते[2] विजातीयाद् व्यावृत्ते सत्यपि सामान्ये किं भेदाविशेषेऽपि गोव्यक्तिष्वेव समवेतं तत् सामान्यं तत्रैव चैकाकारां बुद्धिं जनयतीति प्रश्ने स्वभावेनैवेत्युत्तरं परस्य। तच्च प्रमाणासङ्गतम्। अस्माकं तु स्वभावेनोत्तरं प्रमाणसिद्धत्वात् युक्तिसङ्गतमेव ॥

तथेदमपरं जातिसाधनाय साधनं परस्य। यद् विशिष्टं ज्ञानं तद् विशेषण-ग्रहणनान्तरीयकम्, यथा दण्डिज्ञानम्। विशिष्टज्ञानं चेदं गौरयमित्यर्थतः[3] कार्यहेतुः[4]। अत्रोच्यते—विशिष्टबुद्धेर्भिन्नविशेषणग्रहणनान्तरीयकत्वं साध्यं, विशेषणमात्रानुभवनान्तरीयकत्वं वा[5]। प्रथमपक्षे प्रत्यक्षबाधा। वस्तुग्राहिणि[6] प्रत्यक्षे उभयप्रतिभासाभावात्। विशिष्टबुद्धित्वं च सामान्यमित्यनैकान्तिको[7] हेतुः स्यात्, भिन्नविशेषणग्रहणमन्तरेणापि तस्य दर्शनात्। यथा स्वरूपवानयं घटः, गोत्वसामान्यमिति वा[8]। द्वितीयपक्षे तु सिद्धसाधनम्, स्वरूपवान् घट इत्यादिवत् गोत्वादिजातिमान् पिण्ड इति परिकल्पितभेदमुपादाय[9] विशेषणविशेष्य-

---

1 प्रमाणवार्त्तिकम् ३/७३, द्रष्टव्यः तत्वसंग्रहकारिका ७२३-७२६
2 ०सर्वगतो-क०।
3 ०भावस्यस्पष्टत्वात्-भो०।
4 र0 की0 नि0 पृ0 ६५, १-३, यद्विशिष्टज्ञानं तद्विशेषणग्रहणनान्तरीयकम्। यथा दण्डिज्ञानम्। विशिष्टज्ञानं चेदं गौरयमित्यर्थतः कार्यहेतुः।
5 वा साध्यं-भो०। र0 की0 नि0 पृ0 ६५, ४-५, विशिष्टबुद्धेर्भिन्नविशेषणग्रहणनान्तरीयकत्वं वा विशेषणमात्रानुभवनान्तरीयकत्वं वा।
6 वस्तुरूपग्राहिणि-भो०।
7 ०सामान्येऽनैसान्तिको-क०।
8 र0 की0 नि0 पृ0 ६५, ६-९, प्रथमपक्षे पक्षस्य प्रत्यक्षबाधासाधनावधानमनवकाशयति, वस्तुग्राहिणः प्रत्यक्षस्योभयप्रतिभासाभावात्। विशिष्टबुद्धित्वं च सामान्यहेतुरनैकान्तिकः, भिन्नविशेषणग्रहणमन्तरेणापि दर्शनात्। यथा स्वरूपवान् घटः, गोत्वम सामान्यमिति वा।
9 परिकल्पितव्यवहारमुपादाय-भो०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

भावस्येष्टत्वात्[1]। अगोव्यावृत्त्यनुभवभावित्वात् गौरयमिति व्यवहारस्य। तदेवं अतोऽपि साधनान्न सामान्यसिद्धिरिति[2]। तदेवं परपरिकल्पितसामान्यस्य विचारासहत्वात्, अतद्रूपपरावृत्तवस्तुमात्रमेव[3] सामान्यमपोहशब्दवाच्यं व्यवहाराङ्गं यथाध्यवसायमनवद्यमिति स्थितम्[4]।

सामान्यस्य निषेधाय प्रयोगः पुनरेवं[5] कर्तव्यः—यद्यत्रोपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते तत्तत्र असद्व्यवहारविषयः, यथा तुरङ्गमोत्तमांगे शृङ्गं, नोपलभ्यते चोपलब्धिलक्षणप्राप्तं सामान्यं परिदृश्यमानासु व्यक्तिष्विति स्वभावानुपलब्धिः। न चासिद्धसम्भावना। वर्णसंस्थानलक्षणं[6] व्यक्तिस्वरूपमपहाय द्वितीयस्यानुयायिनो रूपस्य निपुणमपि निरूप्यमाणस्य सर्वथा दर्शनाभावात्, नापि ज्ञानवद्दर्शनाभावेऽपि प्रत्यक्षसिद्धत्वमस्याभिधातुमुचितम्। ज्ञानं हि स्वसंवेदनप्रमाणसिद्धम्, न तु चक्षुर्विज्ञानग्राह्यम्। इदं तु [सामान्यं] चक्षुर्विज्ञानग्राह्यमर्थधर्मत्वात्। प्रत्यक्षं च परैरिष्टमिति। तदेवं परपरिकल्पितसामान्यस्य विचारासहत्वात्, अतद्रूपपरावृत्त-वस्तुमात्रमेव सामान्यमुक्तम्। तस्मात् सर्वं संस्कृतं वस्तु परपरिकल्पितसामान्येन शून्यमिति स्थितम् ॥

ईश्वरसाधननिरसनम्

नापि केनचिद्बुद्धिमतोपरचित्तमित्यपि विज्ञेयम्। तथा हि—अस्य जगतः कर्त्ता भवन् नित्यो वा भवेदनित्यो वा। तत्र न तावन्नित्यो युक्तः, नित्ये कर्त्तरि समर्थे[7] सति सर्गस्थितिप्रलयानां नियमेन यौगपद्यप्रसङ्गात्। येन हि स्वरूपेण स्थितिप्रलययोः

---

1 ०गौरयमिति ज्ञानमर्थतः–भो०।

2 र० की० नि० पृ० ६५, १०–१२, द्वितीयपक्षे तु सिद्धसाधनम्। स्वरूपवान् घट इत्यादिवत् गोत्वजातिमान् पिण्ड इति परिकल्पितं भेदमुपादाय विशेषणविशेष्यभावस्येष्टत्वादगो-व्यावृत्तानुभवभावित्वाद् गौरयमिति व्यवहारस्य।

3 सामान्यम् इति नास्ति–भो०।

4 र० की० नि० पृ० ६५, १२–१४, तदेवं न सामान्यसिद्धिः। बाधकं च सामान्यगुण-कर्माद्युपाधिचक्रस्य केवलव्यक्तिग्राहकं पटुप्रत्यक्षं दृश्यानुपलम्भो वा प्रसिद्धः।

5 ० पुनरेवं–विधः–क०।

6 ० वर्णसंस्थानसहित–क०।

7 सम्बन्धे–भो०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

स कर्त्ता तदस्य स्वरूपं सर्गकालेऽपि सन्निहितमिति तदैव स्थितिप्रलयौ कुर्यात्। सहकारिविरहान्न करोतीति चेत्, तदसत्। न हि नित्येन सहकारिणा कदाचिदप्ययं विरहितः सदा सन्निहितत्वात्। नाप्यनित्येन सहकारिणा विरहितः, अनित्यसहकारिणोऽपि[1] तदायत्तजन्मत्वात्। तत एकदा सर्वकरणादिप्रसङ्गः[2] ॥

ननु बुद्धिमत्त्वादीश्वरस्य नैष दोषः। बुद्धिशून्यो हि स्वसत्तामात्रजन्यं कार्यमक्रमेणैव कुर्यात्। बुद्धिमांस्तु कर्त्तुमीशानोऽपि अनिच्छन्न करोतीति कस्तस्योपालम्भः[3] ? उच्यते—ता अपीच्छाः स्वसत्तामात्रनिबन्धनाः किं न[4] करोतीति स एवास्योपालम्भः। अथ स्वरूपेण सामर्थ्ये सत्यपि एष एव तस्य स्वभावः, यत्सहकारिलक्षणयाऽगन्तुकशक्त्या विना न करोतीति चेत्, तर्हि माताऽपि सति वन्ध्या सा प्रकृत्यैवैतदपि वक्तव्यं भवेद्भवतामिति यत्किञ्चिदेतत्[5] ॥

नन्वेष एव कार्यस्वभावः,[6] केवलात् समर्थादपि नोदेति, सहकारिणमपेक्ष्यैव पश्चाद्भवति[7] [नास्योपालम्भ इति] तन्न युक्तम्। समर्थो हि सहकार्यपेक्षामनादृत्य बलादेव कार्यं कुर्यात्। अन्यथा [ह्यस्य] असमर्थत्वप्रसङ्गात्।[8]

नित्यस्य क्रमकारित्वनिषेधनम्

---

1 ० अनित्यस्य सहकारिणोऽपि–क०।

2 तत्वसंग्रहः कारिका ८७, नेश्वरो जन्मिनां हेतुरुत्पत्तिविकलत्वतः। गगनाम्भोजवत् सर्वमन्यथा युगपद् भवेत्।

3 न्या0 वा0 ४/१/२१

4 ०नास्ति–क०।

5 तत्वसंग्रहः पं0 पृ0 ६९, २०–२४, उद्द्योतकरस्त्वाह—यद्यपि नित्यमीश्वराख्यं कारणमविकलं भावानां सन्निहितम्, तथापि न युगपदुत्पत्तिरीश्वरस्य बुद्धिपूर्वकारित्वात्। यदीश्वरः सत्तामात्रेणैवाबुद्धिपूर्वंभावानामुत्पादकः स्यात्, तदा स्यादेतच्चोद्यम्, यदा तु बुद्धिपूर्वकं करोति तदा न दोषः, तस्य स्वेच्छया कार्येषु प्रवृत्तेः। अतोऽनैकान्तिकतैव हेतोः।

6 ० कार्यस्य स्वभावः–क०।

7 तत्वसंग्रहः पं0 पृ0 ६९, ९–११, स्यादेतत्—नेश्वर एव केवलं कारणम् अपि तु धर्मादि-सहकारिकारणान्तरमपेक्ष्य करोति, निमित्तकारणत्वादीश्वरस्य, येन धर्मादेः कारणान्तरस्य वैकल्यादविकलकारणत्वमसिद्धिमिति।।

8 ० अन्यथा ह्यसमर्थता प्रसङ्गः–क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नापि नित्यः क्रमेण कार्यकारीति[1] युक्तम्, निरपेक्षत्वात्। यदाह दिङ्मण्डलविख्यातकीर्तिर्धर्मकीर्तिः—

नित्यस्य निरपेक्षत्वात् क्रमोत्पत्तिर्न युज्यते ।
क्रियायामक्रियायां च कालयोः सदृशात्मनः[2] ॥ इति ॥

एतेन आत्मादीनामक्षणिकानां[3] घटादीनां क्षणिकानां[4] च क्रमेण कार्यकरणं प्रत्युक्तम्। न चात्र प्रत्यक्षविरोधः, प्रत्यक्षेणाक्षणिकस्य ग्रहणायोगात्। न हि क्षणिकं प्रत्यक्षमक्षणिकमीक्षितुं क्षमते। अनेकक्षणव्यापारो ह्यक्षणिकः। स कथमेकक्षणभाविनाध्यक्षेण ग्रहीतुं शक्यः। न हि प्रागूर्ध्वं चावस्थानमधुना प्रकाशते। तस्याप्यधुनातनताप्रसङ्गात्।[5] जन्मविनाशावधिप्रतिभासप्रसङ्गादिति नेदं प्रत्यक्षं पूर्वापरकालव्याप्तमर्थं[6] कञ्चिदपि ग्रहीतुमलम्।

प्रत्यभिज्ञानस्य प्रत्यक्षत्वं निरसनम्

एतेन प्रत्यभिज्ञानस्याप्रत्यक्षत्वमाख्यातम्।[7] साक्षात्कारि हि ज्ञानं प्रत्यक्षम्। न च प्रागवस्थमधुना साक्षात्कर्तव्यम्, अपि तु स्मर्तव्यम्। न च स्मरणस्वरूपं प्रत्यक्षम्।[8]

अथ मतं भवेदिदं स्मरणं यदिदानीन्तनमवस्थानं न साक्षात्कुर्यात्, तत्साक्षात्करणप्रवणं कथमिदं स्मरणं नाम ? यदाह भट्टः—

'पूर्वप्रमितमात्रे हि जायते स इति स्मृतिः।
स एवायमितीयं तु प्रत्यभिज्ञाऽतिरेकिणी[9] ॥' इति ॥

---

1 ० क्रमेणार्थकरीति–क०।
2 प्रमाणवार्त्तिकम् १/२६९ ।
3 ० नित्यानामादीनामक्षणिकानां–क०।
4 ० नित्यानां आत्मादीनामक्षणिकानां घटादीनां–क०।
5 ० तस्याप्यधुनात्वप्रसङ्गात्–क०।
6 ० पूर्वपरकालव्यासिमर्थं–क०।
7 ० व्याख्यातम्–क०।
8 ० न किञ्चित्प्रत्यक्षं–क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

स्मरणग्रहणस्वरूपं तर्हि प्रत्यभिज्ञानं स्यात्, न तु ग्रहणस्वरूपमेव। स्मर्यमाणे ग्रहणायोगात्, गृह्यमाणे च स्मरणायोगात्। न चैकस्य स्मरणग्रहणे सम्भवतः, परस्परविरोधात्। येन हि स्वरूपेण स्मरणं न तेन स्वरूपेण ग्रहणमित्यनुन्मत्तेन शक्यते वक्तुम्। रूपान्तरेण चैकस्य स्मरणग्रहणे न स्याताम्[1] । भावेऽपि प्रत्यक्षाप्रत्यक्षे स्याताम्। न तु स्मर्यमाणे प्रत्यक्षमेव, प्रत्यक्षायोगात्[2] । तस्मात् प्रत्यभिज्ञाप्रत्ययो भ्रान्त एव, निर्विषयत्वात्।

प्रयोगश्चैवम्—यः प्रत्यभिज्ञाप्रत्ययः स तत्त्वतो नैकालम्बनः, यथा लूनपुनर्जाततृणादिषु। प्रत्यभिज्ञा प्रत्ययश्चायं तदेवेदं नीलादीति प्रत्यय इति विरुद्धव्याप्तोपलब्धिः। एकत्वानेकत्वयोः परस्परविरोधात् तद्विषयकसंवेदनयोरपि विरोधः[3] तेनैकालम्बनत्वेन अनेकालम्बनत्वविरुद्धेन अनेकालम्बनत्वेन पूर्वोक्त्या नीत्या प्रत्यभिज्ञाप्रत्ययो व्याप्त इति न प्रत्यभिज्ञानं क्षणिकानुमानबाधकम्। न च केशादिष्वपि सामान्यालम्बनतया एकालम्बनत्वम्। केशादिव्यक्तेरेव प्रत्यभिज्ञायमानत्वात्। सामान्ये प्रत्यभिज्ञायमाने तदेवेदं केशादीति[4] स्यात्, न तदेवेदं केशादीति। अत एवैकालम्बनत्वे प्रत्यभिज्ञाप्रत्ययस्य क्रमेतराभ्यामुत्पत्तिविरोधात्, विरुद्धानैकान्तिकत्वे नाशङ्कनीये। न च प्रत्यभिज्ञानमेव तदवस्थापकम्, यस्यैव विचार्यमाणत्वात्। तस्मात् स्थितमेतत् नित्यः कर्ता नास्तीति। यदि नित्यः कर्ता जगतो न कारणं, किमस्य तर्हि कारणम् ?

सत्त्वानां शुभकर्मणः जगतः कारणत्वसमर्थनम्

---

9 तत्वसंग्रहः कारिका ४५३, तत्व० पं० पृ० १९९, १३-१६, इदानीन्तनमित्यादिना कुमारिलमतेन गृहीतग्राहित्वस्यासिद्धिमुद्भावयति। स ह्याह—न हि पूर्वप्रत्यक्षेणार्थस्येदानीन्त नस्तित्वमधिगतम्, तस्य स एवायमित्येवमाकारोपग्राहेणानुत्पत्तेः। तस्मादस्य प्रत्यभिज्ञानस्य स्मरणादस्ति विशेषः । कथम्? इत्याह—पूर्वेत्यादि।

1 ०रूपान्तरेण ग्रहणे न एकस्य स्मरणग्रहणे स्याताम्-क०।

2 ०भावेऽपि प्रत्यक्षाप्रत्यक्षत्वं स्यात्, न तु प्रत्यक्षत्वं एव, स्मर्यमाणे प्रत्यक्षायोगात्-क०।

3 ० तद्विषयोरपि संवेदनयोर्विरोधः-क०।

4 ० कोशत्वादीति -क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सत्त्वानां शुभाशुभाख्यं कर्म। यथोक्तम्—[1]

सत्त्वलोकमथ भाजनलोकं
चित्तमेव रचयत्यतिचित्रम्।
कर्मजं हि जगदुक्तमशेषं
कर्म चित्तमवधूय न चास्ति[2] ॥ इति ॥

वैभाषिकमाश्रित्य पुनर्भगवता सर्वज्ञेन चोक्तम्—

'आकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृतम्[3] ।
संस्कृतं क्षणिकं[4] सर्वमात्मशून्यमकर्तृकम्[5] ॥' इति ॥

सर्वज्ञसमर्थनम् भवपरम्परासमर्थनं च

ननु सर्वज्ञसिद्धौ हि तद्वचनं निदर्शनीकर्तुमुचितम्। सर्वज्ञसिद्धये किं प्रमाणमिति चेत्? उच्यते। यो यः सादरनिरन्तरदीर्घकालाभ्यासकलितचेतोगुणः स सर्वः स्फुटीभावयोग्यः, यथा युवत्याकारः कामिनः पुरुषस्य। यथोक्ताभ्यासकलितचेतोगुणाश्चामी चतुरार्यसत्यविषयाकारा इति स्वभावहेतुः[6] ।

न तावदाश्रयद्वारेण हेतुद्वारेण वासिद्धसम्भावना। सङ्कल्पारूढानां चतुरार्यसत्यविषयाकाराणां धर्मिणां चेतोगुणमात्रस्य च हेतोः प्रत्यात्मवेद्यत्वात्[7] । न चैष विरुद्धः, सपक्षे कामिन्याकारे सम्भवात्। न चानैकान्तिकः, अभ्यासेन

---

1 ० व्भगवता तदुक्तम् -क०।

2 ० च नास्ति-क०। माध्यमकावतारः ६/८९ द्रष्टव्यः-बोधिचर्यावतारः, पृष्ठ ३३९, देगे तेनग्युर दबु म० ह पृ० २०८ पं० २ ।

3 अभिधर्मकोशः १/५ ।

4 अभिधर्मकोशः ४/२ ।

5 ज्ञानसारसमुच्चयः देगे तेनग्युर दबु म० छ पृ० २७ पं० ६

6 र० की० नि० सर्वज्ञसिद्धिः पृ० १, १८-२२, यो यः सादरनिरन्तरदीर्घकालाभ्याससहितचेतोगुणः स सर्वः स्फुटीभावयोग्यः। यथा युवत्याकारः कामिनः पुरुषस्य। यथोक्ताभ्याससहितचेतोगुणाश्चामी चतुरार्यसत्यविषया आकारा इति स्वभावो हेतुः।

7 र० की० नि० सर्वज्ञसिद्धिः पृ० ३३, २३-२४, तत्र न तावदाश्रयद्वारेण हेतुद्वारेण वासिद्धिसंभावना। संकल्पारूढानां चतुरार्यसत्याकाराणां चेतोगुणत्वमात्रस्य च हेतोः प्रत्यात्मवेद्यत्वात्।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सहितचेतोगुणस्फुटप्रतिभासयोः कारणकार्ययोः कुम्भकारघटयोरिव सर्वोपसंहारेण प्रत्यक्षानुपलम्भतः कार्यकारणभावसिद्धौ अभ्याससहितचेतोगुणत्वस्य[1] साधनस्य स्फुटप्रतिभासकारणयोग्यतया व्याप्तिसिद्धेः। तथा हि—व्याप्त्यधिकरणे कामातुरवर्तिनि युवत्याकारे सादरनिरन्तरदीर्घकालाभ्याससहितचेतोगुणात् पूर्वमनुपलब्धिः स्फुटाभत्वस्य पश्चादभ्याससंवेदनं, स्फुटाभसंवेदनमिति त्रिविधप्रत्यक्षानुपलम्भसाध्यः कार्यकारणभावः स्फुटप्रतिभासाभ्यास[2]सहित-चित्ताकारयोरित्युपपन्ना सर्वोपसंहारवती व्याप्तिः। अतोऽनैकान्तिकत्वाभावात् अनवद्यो हेतुः[3] ॥

नन्वनेन साधनेन चतुरार्यसत्याकाराणां साक्षात्करणात् चतुरार्यसत्याकार-साक्षत्कारी विवक्षितस्सर्वज्ञः[4] सिध्यति, न त्वविशेषेण सर्वधर्मसाक्षत्कारी, ततस्तत्सिद्धये साधनान्तरमभिधेयम्। उच्यते—यत्प्रमाणसंवादि निश्चितार्थं वचनं, तत् साक्षात् पारम्पर्येण वा तदर्थसाक्षत्कारिज्ञानपूर्वकं, यथा दहनो दाहक इति वचनम्, प्रमाणसंवादि निश्चितार्थं चेदं वचनं, क्षणिकाः सर्वसंस्कारा इति अर्थतः कार्यहेतुः। नास्यासिद्धिः, सर्वधर्मक्षणभङ्गप्रसाधनादस्य वचनस्य सत्यार्थत्वात्। नापि विरुद्धः, सपक्षे भावात्। न चानैकान्तिकता, वचनमात्रस्य संशयविपर्यासपूर्वकत्वेऽपि प्रमाण [संवादि] निश्चितार्थस्य [वचनस्य] साक्षात् पारम्पर्येण वा

---

1 ०चेतोधर्मस्य–भो०।

2 ०भ्यासविशेषचित्ता०–भो०।

3 र० की० नि० सर्वज्ञसिद्धिः पृ० ३, २२–२९, न चैष विरुद्धो हेतुः। सपक्षे कामिन्याकारे संभवात्। न चानैकान्तिकः। अभ्याससहितचेतोगुणस्फुटप्रतिभासयोः कार्यकारणयोर्घट-कुम्भकारयोरिव सर्वोपसंहारेण प्रत्यक्षानुलम्भतः कार्यकारणभावसिद्धावभ्याससहितचेतो-गुणत्वस्य साधनस्य स्फुटप्रतिभासकरणयोग्यतया व्याप्तिसिद्धेः। तथा हि व्याप्त्यधिकरणे कामातुरवर्तिनि युवत्याकारे सादरनिरन्तरदीर्घकालाभ्याससहितचेतोगुणात् पूर्वमनुपलब्धिः स्फुटाभस्य। पश्चादभ्यासंवेदनं स्फुटाभसंवेदनमिति। त्रिविधप्रत्यक्षानुलम्भसाध्यः कार्यकारण-भावः स्फुटप्रतिभासाभ्याससचिवचित्ताकारयोयिमुपपन्ना सर्वोपसंहारवती व्याप्तिः। अतोऽनैकान्तिकताप्यसंभविनीत्यनवद्यो हेतुः।

4 ० व्साक्षात्कारी सर्वज्ञः –क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

तदर्थसाक्षात्कारिज्ञानपूर्वकत्वेन[1] प्रत्यक्षानुपलम्भाभ्यामुपलम्भात्। अन्यथा धूमादावपि हेतुत्यागप्रसङ्गादशेषकार्यहेतूच्छेदप्रसङ्गः[2] ॥

भवपरम्परानिरूपणम्

स्यादेतत्। अनेकभवपरम्परालक्षणेन दीर्घकालेन भाव्यस्य सङ्कल्पारूढस्य स्फुटाभत्वं सम्भाव्यते[3]। भवपरम्परासिद्धये तु किं प्रमाणम् ? उच्यते। यच्चित्तं तत् चित्तान्तरं प्रतिसन्धत्ते, यथेदानीन्तनं चित्तम्। चित्तं च मरणकालभावीति स्वभावहेतुः[4]। न चार्हच्चरमचित्तेन व्यभिचारः। तस्यागममात्रप्रतीतत्वात् निःक्लेशचित्तान्तरजननाद्वा[5]। हेतोः क्लेशे सति[6]। विशेषापेक्षणादि[7]त्यनागतभवसिद्धिः। इह पूर्वजन्माभ्यासात् तपोदानाध्ययनादौ सर्वसत्त्वानामभ्यासे प्रवृत्तिरिति प्रवादः। ततस्तत्सिद्धये प्रमाणमुच्यते—यच्चित्तं तत् चित्तान्तरपूर्वकं यथेदानीन्तनं चित्तम्। चित्तं च जन्मसमयभावीत्यर्थतः कार्यहेतुः[8] ॥

वैभाषिकमतनिरू पणम्

---

1 ० तदर्थसाक्षात्कारिज्ञानपूर्वकत्वस्य -क०।

2 ० प्रसङ्गात्-क०। र० की० नि० सर्वज्ञसिद्धिः पृ० ३१, १३-२१, यत्प्रमाणसंवादि-निश्चितार्थवचनं तत्साक्षात् परम्परया (वा) तदर्थसाक्षात्कारिज्ञानपूर्वकम्। यथा दहनो दाहक इति वचनम्। प्रमाणसंवादि निश्चितार्थवचनं चेदम्। क्षणिकाः सर्वज्ञसंस्कारा इत्यर्थतः कार्यहेतुः। नास्यासिद्धिः, सर्वभावक्षणभङ्गप्रसाधनादस्य वचनस्य सत्यार्थत्वात् । नापि विरोधः, सपक्षे भावात्। न चानैकान्तिकः, वचनमात्रस्य संशयविपर्यासपूर्वकत्वेऽपि प्रमाणनिश्चितार्थवचनस्य साक्षात्पाम्पर्येण तदर्थसाक्षात्कारिज्ञानपूर्वकत्वात्। अन्यथा नियमेन प्रमाणसंवादयोगात्।

3 ०भाव्यमानस्य सङ्कल्पारूढत्वं सम्भाव्यते-क०।

4 तत्वसंग्रहः कारिका १८९८, मरणक्षणविज्ञानं स्वोपादेयोदयक्षमम्। रागिणो हीनसङ्गत्वात् पूर्वविज्ञानवत् तथा॥ तत्व० पं० पृ० ६५२, २१-२२, मरणेत्यादि। यत्सरागं चित्तं तत् स्वोपदेयचित्तन्तरोदयसमर्थम्, सरागत्वात् पूर्वावस्थाचित्तवत्। सरागं च मरणचित्तमिति स्वभावहेतुः।

5 तत्वसंग्रहः कारिका १८६२, सरागमरणं चित्तं न चित्तान्तरसन्धिकृत्। मरणज्ञानभावेन वीतक्लेशस्य तद् यथा॥

6 ०हेतो र्वा क्लेशे सतीति-क०।

7 ० वविशेषणापेक्षणादि -क०।

8 तत्वसंग्रहः कारिका १८९६, तस्मात् तत्रादिविज्ञानं स्वोपादानबलोद्भवम्। विज्ञानत्वादिहेतुभ्य इदानीन्तनचित्तवत्।।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

ननु तत्त्वसाक्षात्करणान्मुक्तिः। तत्त्वं चैकमेव, यथोक्तम्—

'मुक्तिस्तु शून्यतादृष्टिस्तदर्थाशेषभावना'[1] इति।

तत्कथं सर्वज्ञद्वैतं, बौद्धप्रभेदश्चेति ? नैष दोषः। यस्मात्सर्वमेतद् भूतार्थे सत्त्वानवतारयितुं भगवता प्रतिपादितम्। तथा हि वैभाषिकाणां मतम्—

'आकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृतम्[2] ।
संस्कृतं क्षणिकं सर्वमात्मशून्यमकर्तृकम्[3] ॥' इति ॥

सौत्रान्तिकानां मतम्

ज्ञानमेवेदं सर्वं नीलाद्याकारेण प्रतिभासते,[4] न बाह्योऽर्थः, जडस्य प्रकाशायोगात्। यथोक्तम्—

'स्वकारज्ञानजनका दृश्या नेन्द्रियगोचाराः'[5] ॥ इति ॥

अलङ्कारेणाप्युक्तम्—

यदि संवेद्यते नीलं कथं बाह्यं तदुच्यते ।
न चेत्संवेद्यते नीलं कथं बाह्यं तदुच्यते[6] ॥

ननु यदि प्रकाशमानं ज्ञानमेवदं, तदाऽस्ति बाह्योऽर्थ इति कुतः ? बाह्यार्थसिद्धिस्तु स्याद्व्यतिरेकतः। न हि सर्वत्र सर्वदा नीलादय आकाराः प्रकाशन्ते।

---

1 प्रमाणवार्त्तिकम् १/२५५ ।
2 अभिधर्मकोशः १/५ ।
3 ज्ञानसारसमुच्चयः कारिका -२३
4 ० व्रतिभाति -क०।
5 अभिधर्मकोशः ४/२ ।
6 धियो नीलादिरूपत्वं बाह्योर्थः किं प्रमाणकः ।
द्रष्टव्यः—प्रमाणवार्त्तिकालङ्कारः ३/७१८

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

न चैतत् स्वोपादानमात्रबलभावित्वे सति[1] युज्यते। नियतविषये प्रवृत्त्ययोगात्। तस्मादस्ति किञ्चिदेषां समनन्तरप्रत्ययव्यतिरिक्तं कारणं, यद्बलेन क्वचित् कदाचित् भवन्तीति शक्यमवसातुम्। स एव बाह्योऽर्थ इति, न पुनरसौ बाह्योऽर्थः[2] अवयवी, गुणादयो धर्माः द्रव्याश्रयिणः पराभिमताः, नवविधं द्रव्यं परमाणवो वेति[3]। तत्र न तावत् गुणादयः, द्रव्यनिषेधेनैव तेषां निषेधात्।[4] न चासति समवायिनि द्रव्ये समवाय इति तद्दूषणमत्र[5] नाद्रियते। द्रव्यं च पृथिव्यापस्तेजोवायुराकाशं कालो दिगात्मा मन इति नवविधम्।

आत्माकाशकालदिङ्मनसां निरसनम्

तत्रात्मनिषेधायेदमपि साधनम्—यत्कादाचित्कं ज्ञानं तत्कादाचित्ककारण-पूर्वकम्, यथा सौदामिनीज्ञानम्। कादाचित्कं चेदमहंकारज्ञानमित्यर्थतः कार्यहेतुः। नायमसिद्धः अहंकारे धर्मिणि ज्ञानत्वस्य प्रत्यक्षसिद्धत्वात्। नापि कादाचित्कविशेषणमसिद्धम्, सर्वदाऽहमिति ज्ञानाभावात्। नापि विरुद्धः, सपक्षे दर्शनात्। न चानैकान्तिकः, धूमपावकयोरिव कादाचित्कज्ञानकादाचित्ककारणयोः प्रत्यक्षानुपलम्भाभ्यां व्याप्तिसिद्धेः। कादाचित्कज्ञानस्य चाकादाचित्ककारणादुत्पत्तौ कादाचित्ककारणादनुत्पत्तिप्रसङ्गः। अनियतहेतुकतायां चाहेतुकताप्रसङ्गः, तथाऽप्यनैकान्तिकत्वे प्रसिद्धधूमादिहेतुरप्यनैकान्तिकः स्यात्, विशेषाभावात्। अपि चाहंकारस्य अकादाचित्ककारणपूर्वकत्वे सदैवोदयप्रसङ्गः।[6] कारणस्य कुर्वद्रूपत्वात्, अकुर्वतश्चोपचारतः कारणत्वात्[7], कुर्वदकुर्वतोरैक्याभावात्। भावे वा कुर्वतोऽप्यकुर्वद्रूपतापत्तिः[8], तत्स्वभावत्वात्। किञ्चाहंकारस्य अकादाचित्क-

---

1 ०स्वोपादानमात्रबलप्रतिभासित्वे सति–क०।
2 ० व्पुनरसौ बाह्योऽर्थः –क०।
3 वै०द० १/१/४, पृथिव्यापस्तेजोवायुराकाशं कालो दिगात्मा मनः।
4 ० निषिद्धत्वात् –क०।
5 ०दूषणमपि–क०।
6 ० सदैवोत्पादप्रसङ्गः –क०।
7 ० औपचारिककारणत्वम्–क०।
8 ०कुर्वतोऽप्युत्पत्तिः–क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

कारणादुत्पादे युगपदेवोत्पादप्रसङ्गः[1], अव्यग्रसामग्रीकत्वात्। नन्वहंकारस्यालम्बनमात्मा न कारणमिति चेन्न। अकारणस्यालम्बनत्वायोगादतिप्रसङ्गादिति ॥

अथ किमाकाशं नाम किञ्चिद्वस्तुभूतमस्ति? उत नास्ति वा ? नास्त्येवैतत्। यत्र हि सप्रतिघं द्रव्यमस्ति न तत्राकाशमवकाशं वा ददाति। यत्र नास्ति तत्र तदभावादेवावकाशः सिद्ध इति क्व वाऽऽकाशमवकाशं[2] दद्यात् ? [यस्मादवकाशप्रदमाकाशं भण्यते] तस्मात् सत्यस्मिन् सर्वदा सर्वथा सर्वत्रावकाशः स्यात्। न चैतदस्ति। तस्मान्नास्त्येवाकाशमिति प्रतीमः। एतच्च वैभाषिकमतपेक्ष्य दूषणमुक्तम्।

परैस्त्वाकाशं शब्दगुणकमिष्यते। तच्चैकमिति चेत् समानदेशत्वात् सर्वशब्दानां विभागेन श्रवणं न स्यात्। ततस्सन्निहितदेश इव दूरदेशाभिमतोऽपि शब्दः श्रूयेत।[3] न वान्योऽपीत्येकान्तः।[4] दिक्कालयोश्चैकत्वात् पूर्वापरादिप्रत्ययानुपपत्तिः। एतेन नित्यस्यापि मनसोऽसम्भव एव। तथा हि—युगपज्ज्ञानानुत्पत्त्या मनोऽनुमीयते तद्वादिभिः[5]। अनुभूयन्त एव युगपद्बहूनि ज्ञानानि नर्त्तकीदर्शनादौ। यदि पुनर्मनो [नित्यं] स्यात्तदानीमेतानि ज्ञानानि न युज्यन्ते। तस्मान्नास्त्येव मनोऽपि ॥

अवयविनिरसनपूर्वकं परमाणुमात्रसमर्थनम्

पृथिव्यादयोऽवशिष्यन्ते। ते चावयविपरमाणुभेदेन द्विधा इष्यन्ते[6]। तत्र योऽवयवी घटादिः परमाणुभिर्द्व्यणुकादि[7]क्रमेणारब्धः प्रसिद्धः, तस्य उपलब्धि-

---

1 न्यायसूत्रम्-१/१/१६, युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्। द्रष्टव्यः तत्वसंग्रहः पृ० २६०, २०
2 ० तत्काकाशमवकाशं –क०।
3 ० प्रतीयेत –क०।
4 ० वान्योऽपीत्यनैकान्तिकः –क०।
5 तत्वसंग्रहकारिका ६३२, नित्ये तु मनसि प्राप्ताः प्रत्यया यौगपद्यतः। तेन हेतुरिह प्रोक्तो भवतीष्टविघातकृत्।।
6 तत्वसंग्रहकारिका ५४९, पृथिव्याद्यात्मकास्तावद् य इष्टाः परमाणवः। तेऽनित्या ये तदाद्यैस्तु आरब्धास्ते विनाशिनः।।
7 ० परमाणुभिर्ध्यणुकादि –क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

लक्षणप्राप्तस्यानुपलम्भो बाधक इत्युक्तम्। यद्यवयवी नास्ति कथं तर्ह्ययमेकत्वेन प्रतिभासत इति चेत्—

भागा एव भासन्ते सन्निविष्टास्तथा तथा।
तद्वान्नैव पुनः कश्चिन्निर्भागः सम्प्रतीयते[1] ॥

इत्युक्तम्। ननु कोऽयं भागप्रतिभासो नाम ? नानादिग्देशावष्टम्भेन सञ्चितः परमाणुप्रतिभास एव।[2] यद्येवं कथं 'प्रतिभासधर्मः स्थौल्यम्' इत्युक्तं धर्मोत्तरेण, तत्राप्ययमेवार्थः। अर्थस्य स्वरूपेण नास्ति वेदनम्, 'भाक्तं स्यादर्थवेदनम्' इति वचनात्। तस्माद्योऽयं नीलादिप्रतिभासो नानादेशव्यापित्वेनानुभूयते स एव स्थूलप्रतिभास इत्यदोषः। येऽपि तदारम्भकाः परमाणवो वैशेषिकाणां, साक्षादध्यक्ष्यगोचरा[3] वैभाषिकाणां दर्शने,[4] स्वस्वाकारसमर्पणप्रवणाः[5] सौत्रान्तिकानां मते, तेऽपि योगाचाराणां दर्शने न सम्भवन्ति। न खल्वेकः परमाणुः[6] प्रसिद्धिमध्यास्ते। तस्याधरोत्तरचतुर्दिक्षु परमाणुमध्यासीनस्य नियमेन षडंशतापत्तेः। यो ह्यस्य स्वभावः पूर्वपरमाणुप्रत्यासन्नः[7] न स एवापरपरमाणुप्रत्यासन्नो[8] घटते। तयोरेकदेशताप्राप्तेः। एवं च स पूर्वपरमाणुसन्निहितस्वभावोऽपरपरमाणुं[9] प्रत्यासीदेद्यदि सोऽपि तत्र स्यात्। असत्यामपि प्रत्यासत्तावाभिमुख्यमात्रेऽप्ययमेव वृत्तान्तः। ततश्च परमाणुमात्रं पिण्डः प्रसक्तः ॥

योगाचारस्य मतम्

---

1 हेतु० बि०टी० पृ० १०६, २५-२६
2 ० सञ्चितपरमाणुप्रतिभास एव -क०।
3 ० साक्षादक्षिगोचरा -क०।
4 ० योगाचाराणां मते -क०।
5 ० स्वाकारसमर्पणप्रवणाः -क०।
6 मध्यः परमाणुः-भो०।
7 ० पूर्वपरमाणुप्रत्यासत्तौ -क०।
8 पश्चिमपरमाणुः-भो०।
9 पश्चिमपरमाणुं-भो०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

अथवाऽयं विचारः, यदेतत्प्रतिभासमानं तदेकं तावन्न युक्तम्, अनन्तरोक्त-विचारात्। नाप्यनेकं, परमाणुशः परमाणोरयोगात्[1]। तथा हि—यद्यसौ सांशः कथं परमाणुः ? अथ निरंशः तदा संयुक्ताः परमाणवः सर्वात्मना संयोगात् परस्परमभिन्नदेशाः स्युरिति सर्वः पिण्डः परमाणुमात्रं स्यात्, पर्वतोऽपि क्षितिरपीति। तस्मादवश्यं तयोः स्वभावयोर्भेदोऽभ्युपेतव्यः। यथा चानयोस्तथाऽधरोत्तरदक्षिणोत्तरपरमाणुप्रत्यासन्नानां स्वभावानां च भेद इति षडंशतैव परमाणोर्न्यायबलादापतति। यदाह—

षट्केन युगपद्योगात् परमाणोः षडांशता ।
षण्णां समानदेशत्वात्[2] पिण्डः स्यादणुमात्रकः[3] ॥ इति।

न चैकासिद्धौ अनेकस्यापि सिद्धिरिति न सन्ति परमाणवः। यदि बाह्योऽर्थो नास्ति किं विषयस्तर्ह्ययं प्रतिभासः ? प्रतिभासः खल्वेषोऽनादिवितथवासनातः प्रवर्तमानो निरालम्बन एव लक्ष्यते। तथा हि—सति विषये सालम्बनता स्यात्। तेन चावयविना भवितव्यम्, परमाणुप्रचयेन वा। स चायमुभयोऽप्यनन्तरोक्त बाधकप्रमाण[ग्राह] ग्रस्तविग्रहो न व्योमतामरसमतिशेते यथोक्तम्—

[न सन्नावयवी नाम न सन्ति परमाणवः ।]
प्रतिभासो निरालम्भः स्वप्नानुभवसन्निभः[4] ॥ इति ॥

निरालम्बनवादः

स्वप्नज्ञानं निरालम्बनं विदितमेव। न च स्वप्रजाग्रदनुभवयोर्भेदः कश्चिदप्यस्ति। सर्वप्रकारसाधर्म्यदर्शनात्। न चानालम्बनादनवाप्तरूपविशेषं विज्ञानं

---

1 अनुपलम्भात्-भो०।
2 ० विवादाध्यासितं -क०।
3 विंशितिकाकारिका १२, द्रष्टव्यः तत्वसंग्रहः १९३६, न तावत् परामाणूनामाकारः प्रतिवेद्यते। निरंशानेकमूर्त्ताप्रत्यया प्रतिवेदनात्॥
4 ज्ञानसारसमुच्चयः कारिका २६, द्रष्टव्यः ज्ञानश्रीमित्रनिबन्धावलिः पृ० ४३५, ९, ग्राह्यग्राहकवैधुयाद् विज्ञानं परमार्थसत्। एकानेकवियोगेन विज्ञानस्यापि शून्यता॥

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

सालम्बनसम्बन्धमनुभवितुमुत्सहते। यदनालम्बनादविशिष्टं तदनालम्बनम्, यथैकस्मादाकाशकेशदर्शनात् द्वितीयम्[1] [ज्ञानं]। अनालम्बनाच्च स्वप्नज्ञानादविशिष्टं विवादास्पदीभूतं[2] जाग्रद्विज्ञानमिति स्वभावहेतुः ॥

विज्ञानस्यस्य साकारत्वनिराकारत्वपक्षभेदः

यदि बाह्योऽर्थो नास्ति किं तर्हि परमार्थसत् ?[3] ग्राह्यग्राहकादिकलङ्कानङ्कितं निष्प्रपञ्चविज्ञानमात्नं परमार्थसत्। यथोक्तम्—

'ग्राह्यग्राहकनिर्मुक्तं विज्ञानं परमार्थसत्'[4] इति।

पुनश्चोक्तम्—

'नान्योऽनुभाव्यो बुद्ध्याऽस्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते[5] ॥'

उक्तं चैतद्भगवता—

'बाह्यो न विद्यते ह्यर्थो यथा बालैर्विकल्प्यते ।
वासनालुठितं चित्तमर्थाभासं प्रवर्त्तते[6] ॥' इति ॥

साकारवादिनां मतम्

तत्न केचिदेवमाहुः[7]—विज्ञानमेवेदं सर्वं सर्वशरीरविषयभावेन प्रसिद्धम्, तच्च स्वसंवेदनमिति न कस्यचित् ग्राह्यं ग्राहकं वा। कल्पनया तु ग्राह्यग्राहकभाव

---

1 द्वितीयाकाशकेशदर्शनवत्–भो०।
2 ० समानदेशत्वेन –क०।
3 ० किं तर्हि सत्? –क०।
4 ज्ञानसारसमुच्चयः कारिका २६ ।
5 प्रमाणवार्त्तिकम् ३/३२८ ।
6 लङ्कावतारसूत्रम् १०/६२४, किञ्चित् पाठान्तरम्।
बाह्यो न विद्यते दृश्यं तथा बालैर्विकल्प्यते।
बिम्बवत्ख्यायते चित्तं वासनैर्भ्रमणीकृतम् ॥ इति पाठान्तरम्॥
7 ० केचिदाहुः–क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

इति व्यवस्थाप्यते[1]। ततः परिकल्पितग्राह्यग्राहकभावरहितं विज्ञानं [साकारं] सत्यमिति।

निराकारवादिनां मतम्

अन्ये तु सकलाकारकलङ्कानङ्कितं शुद्धस्फटिकसंकाशं[2] वास्तवं विज्ञानम्[3]। आकारास्त्वमी वितथा एवाविद्यया दर्शिताः प्रकाशन्ते। तस्मात् ग्राह्यं नाम नास्त्येव। [4]ग्राह्याभावात् तदपेक्षया यद्ग्राहकत्वं विज्ञानस्य तदपि नास्तीति। माध्यमिकानां तु दर्शने तदपि विज्ञानं[5] न परमार्थसत्, विचारासहत्वात्। स्वभावेन हि युक्तं पारमार्थिक मुच्यते लोके। न चास्य विचारतः कश्चित्स्वभावो घटते, एको वाऽनेको वा, पूर्वविचारासहत्वात्[6]। यथोक्तम्—

'नेष्टं तदपि धीराणां विज्ञानं पारमार्थिकम्।
एकानेकस्वभावेन वियोगाद्गनाब्जवत्[7]॥' इति॥

कीर्तिपादैरप्युक्तम्—

'भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः।
यस्मादेकमनेकं वा रूपं तेषु न विद्यते॥'[8] इति॥

तथाऽलङ्कारकारेणाप्युक्तम्—

'यदा तु न विकल्पस्य न चान्यस्य प्रमाणता।
तदा विशीर्यमाणेऽपि[9] सर्वस्मिन् कोऽपराध्यतु[10]॥'

---

1 समारोप्यते-भो०।
2 ०शरद्विमलमध्याह्नाकाशमिव—इत्यधिको भोटपाठः।
3 विज्ञानमिति चिन्त्यते-भो०।
4 सर्वथा तदभावात्-भो०।
5 ० ज्ञानं -क०।
6 पूर्वोक्तविचारात्-भो०।
7 ज्ञानसारसमुच्चयकारिका २७
8 प्रमाणवार्तिकम् २/३६०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

'बद्धमुक्तादि[1] भेदोऽपि[2] नैवास्ति[3] परमार्थतः ।
भेदो हि नावभात्येव सर्वत्र समदर्शिनाम्[4] ॥' इति ॥

प्रयोगः पुनरेवम्—यदेकानेकस्वभावं न भवति न तत्परमार्थसत्, यथा व्योमकमलम्, एकानेकस्वभावं च न भवति विज्ञानमिति व्यापकानुपलब्धिः। न तावदयमसिद्धो हेतुः। साकारे ज्ञाने बहिरर्थ इव एकानेस्वभावायोग्यत्वस्य परिस्फुटत्वात्। यत्र हि लोकस्य बाह्यार्थव्यवहारस्तदेव साकारवादिनो ज्ञानम्, ततो यत्तस्य बहिर्भावे बाधकं[5] तदेवान्तर्भावेऽपि बाधकम्। न हि स्थूलमेकमनेकं च परमाणुरूपमपीष्यते[6]। विज्ञानात्मकानामयमाकारो[7] यद्येकः स्थूलो यदि वाऽनेकः परमाणुशो भिन्नः,[8] उभयथाऽपि बाह्यार्थपक्षभावि[9]दूषणमशक्यमुर्द्धतुम्। न हि तद्विज्ञाने बहिर्भावनिबन्धनं दूषणम् ! येन तद्भावेन भवेत्। मूर्तिनिमित्तं बाधकम्,

---

9 ० विशीर्यमाणे तु -क०।
10 प्र० वा० भा० कारिका ३/९०७-९०८
1 ०बन्धमुक्तादि-क०। ०बुद्धस्वप्न-भो०।
2 पृथ्वीस्वप्नादिभेदोऽपि-भो०। द्रष्टव्यः प्रमाणवार्तिकः २/२०८-२०९,
चित्रावभासेष्वर्थेषु यद्येकत्वं न युज्यते। सैव तावत् कथं बुद्धिरेका चित्रावभासिनी।।
इदं वस्तुबलायातं यद् वदन्ति विपश्चितः। यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा॥
द्रष्टव्यः ज्ञानश्रीमित्रनिबन्धावलिः पृ० ३६७, १२-१५, बाह्यं न तावदिदमेव यतः प्रकाशरूपं स्वतो नियमतश्च सहोपलब्धेः। युक्त्या न चान्यदिह संभविसंभवेऽपि। न ग्राह्यलक्षणमतो मतिमात्रमेतत्॥
3 ०न चास्ति-क०।
4 प्र० वा० भा० ३/९०२
5 ० भावबाधकं -क०।
6 ०ततो यत् तस्य बहिर्भावे भावबाधकं तद् एवान्तर्भावेऽपीति बाधकेन हि परमाणरूपम् अपोह्यते -क०।
7 ०विज्ञानात्मकश्चायं आकारो-भो०।
8 अलङ्कारे महात्मना बोधिसत्त्वेनाप्युक्तम्—संख्याकारसमानं चेद् विज्ञानमिष्यते तदा। परमाणुसमत्वेन विचारोऽयं दुरुद्धार्यः॥ मध्यमकालङ्कारः कारिका ४९ इति भोटानुवादेऽधिको पाठः।
9 ० बाह्यार्थभावि -क०।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

नामूर्ते[1] विज्ञानात्मनि इत्यपि निस्सारम्। साकारतायां विज्ञानस्यापि[2] मूर्तत्वात्। अयमेव हि देशवितानवा [नाकारो][3] मूर्तिरिति ॥

श्रीमन्महाजगद्दलविहारीय महापण्डित[4]भिक्षुमोक्षाकरगुप्तविरचितायां तर्कभाषायां परार्थानुमानपरिच्छेदः तृतीयः सामाप्तः ॥

ग्रन्थाग्रं श्लोकमानं ८४०

तर्कभाषामिमां कृत्वा पुण्यमासादि यन्मया ।
तेन पुण्येन लोकोऽयं बुद्धत्वमधिगच्छतु ॥

*यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

उदकानलचौरेभ्यः मूर्खकेभ्यस्तथैव च ।
कष्टेन लिखितं शास्त्रं यत्नेन परिपालयेत् ॥*

तर्कभाषा समाप्ता ॥

●●●

1 ० नामूर्त -क० ।
2 ज्ञानस्यापि -क० ।
3 ० देशचित्तानामाकारो -क० ।
4 ० श्रीमद्राजजगद्दलविहारीयमहायति -क० ।
- नास्ति-क, भो० ।

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

༄༅། །རྒྱ་གར་སྐད་དུ། ཏཀྐཱཿ

བོད་སྐད་དུ། རྟོག་གེའི་སྐད།

མངོན་སུམ།

སངས་རྒྱས་ལ་ཕྱག་འཚལ་ལོ།།

མཆོད་བརྗོད།

བླ་མ་འཇིག་རྟེན་དབང་བཏུད་ནས། །
བྲིས་པ་ཡིད་གཞུངས་ཆུང་བ་རྣམས། །
ཆོས་ཀྱི་གྲྭ་པའི་ལུགས་མཁན་ཕྱིར། །
རྟོག་གེའི་སྐད་ནི་རབ་གསལ་བྱ། །

ཚད་མ་སྤྱིའི་མཚན་ཉིད་བསྟན་པ།

འདིར་རྟོག་པ་སྔོན་དུ་གཏོང་བ་དོན་དུ་གཉེར་བའི་སྐྱེ་བོ་རྣམས། སྐྱེ་བུའི་དོན་ཐམས་ཅད་འགྲུབ་པའི་རྒྱུ་མཚན་ཚད་མའི་རྗེས་སུ་འབྲང་བས་དང་པོར་ཚད་མ་གཏན་ལ་དབབ་པར་བྱའོ།[1] །ཚད་མ་ནི་ཡང་དག་པའི་ཤེས་པ་སྟེ་རམ་

1 རིགས་ཐིགས། ཅེ ༣༣༡ ན ཕྲེང་ ༡ སྐྱེས་བུའི་དོན་ཐམས་ཅད་འགྲུབ་པའི་སྔོན་དུ་འགྲོ་བ་ཅན་ཡིན་པས་ན་དེ་བསྟན་ཏོ། །ཞེས་དང་། རིགས་ཐིགས་རྒྱ་ཆེར་འགྲེལ། ཕྱི ༣༠༨ ༡ ན

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

རྟོགས་པའི་སྤྱོད་ཡུལ་ཅན་ནོ། །འདྲིས་དོན་འཇལ་བས་ན་ཚད་མ་ཡིན་ལ་དེ་ཉིད་ཡང་དག་པའི་ཤེས་པ་སྟེ་ཐེ་ཚོམ་དང་ཕྱིན་ཅི་ལོག་གི་སྒྲིབ་དང་བྲལ་བ་ཉིད་ཀྱི་ཕྱིར་རོ། །སླུ་བ་མེད་པའི་ཤེས་པ་ནི་འཇིག་རྟེན་ན་ཡང་དག་པའི་ཤེས་པར་བརྗོད་ལ། ཐེ་ཚོམ་དང་ཕྱིན་ཅི་ལོག་གི་ཤེས་པ་དག་ལ་མི་སླུ་བ་ཉིད་ཡོད་པ་ཡང་མ་ཡིན་ཏེ། ཤིང་ཀྲམ་མམ་མི་ཡིན་སྙམ་པའི་ཤེས་པ་དང་། སྨིག་རྒྱུ་ལ་ཆུའི་རྣམ་པར་ཤེས་པ་བཞིན་ནོ། །དེའི་སྤྱོད་ཡུལ་སྔར་མེད་པ་ཡིན་པས་སྔར་མ་རྟོགས་པའི་སྤྱོད་ཡུལ་ཅན་ནོ། །སྤྱོད་ཡུལ་ནི་ཡུལ་དེ་བུམ་པ་ལ་སོགས་པ་ཡིན་ལ། དེ་ལས་སྐྱེས་པ་དེའི་དོན་ཐོབ་པར་རུང་བའི་ཤེས་པ་ནི་ཚད་མའོ།།

ཚད་མའི་བྱེད་ལས།

འོ་ན་གལ་ཏེ་ཤེས་པ་བྱེད་པ་པོ་དང་སྐྱེས་བུ་སྤྲུར་བར་བྱ་བ་དང་དོན་ལས་སུ་གྱུར་པ་གང་གི་ཚེ་ཡང་ཐོབ་པར་མི་བྱེད་ན། དེ་ཐོབ་པར་བྱེད་པ་པོ་མ་ཡིན་པ་ཉིད་ཀྱི་ཕྱིར་ཇི་ལྟར་ཚད་མ་ཡིན་[1]ཞེ་ན། བརྗོད་པར་བྱ་སྟེ། ཤེས་པས་སྐྱེས་བུ་མགྲིན་པ་ནས་བཀུག་པའི་ཚུལ་དུ་[2]སྟོབས་ཀྱིས་དོན་ལ་རབ་ཏུ་གཞུག་པར་བྱ་

ཤྲང་ ༣ ཡང་དག་པའི་ཤེས་པ་ནི། སྐྱེས་བུའི་དོན་ཐམས་ཅད་འགྲུབ་པའི་སྔོན་དུ་འགྲོ་བ་ཅན་ཡིན་པས་ན་དེ་བསྟན་ཏོ། །ཞེས་སོ།།

1 ལེགས་སྦྱར། ཚད་མར་འགྱུར།

2 ལེགས་སྦྱར། མགྲིན་པར་གཅུའ་ཤིང་གི། རིགས་ཐིགས་རྒྱ་ཆེར་འགྲེལ། ལྡེ ༣༧ བ ༦ འཇུག་པར་བྱེད་པ་ཡང་འཇུག་པའི་ཡུལ་སྟོན་པར་བྱེད་པ་ཉིད་ཀྱིས། སྐྱེས་བུ་རྣམས་བཙན་ཐབས་སུ་ཤེས་པས་གཞུག་པར་ནི་མི་ནུས་སོ།།

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

བ་མ་ཡིན་གྱི། འོན་ཀྱང་འདི་ལྟ་བུར་གྱུར་པ་འདི་དངོས་པོའི་རང་བཞིན་ཏེ། རྣམ་པ་གཞན་དུ་ནི་མ་ཡིན་ནོ། །ཞེས་པའི་རྣམ་པ་འདིས་ངེས་པ་བསྐྱེད་པར་བྱ་བ་མ་ཡིན་ཞིང་། དེ་གལ་ཏེ་དེས་བྱས་ན་དེ་ཙམ་ཉིད་དེའི་ཚད་མ་ཡིན་པས་འགལ་བ་མེད་ལ། སྐྱེས་བུ་ནི་དེ་ལ་དགོས་པའི་དབང་ལས་འཇུག་པ་ཉིད་དེ་དགོས་པ་མེད་ན་མི་འཇུག་པ་ཉིད་དོ། །དོན་ཡང་རྣལ་འབྱོར་པ་དང་ཤཱ་ཟ་ལ་སོགས་ཉིད་ཀྱིས་བསྒྲིབས་པ་ཉིད་དེ། ཤེས་པ་ལ་ནི་རིང་བ་ཅི་ཞིག་ཡོད།

སྐད་ཅིག་མ་ཡིན་དུ་ཟིན་མོད་ཚད་མ་མ་ཡིན་པའི་སྐྱོན་སྤོང་བ།

འོ་ན་སླུ་བ་ཉིད་ཀྱིས་ཤེས་པ་ཚད་མ་ཡིན་ལ། མི་སླུ་བ་ཉིད་ཀྱང་མཐོང་བའི་དོན་ཐོབ་པར་བྱེད་པ་ལས་ཡིན་ན། གང་མཐོང་བ་དེ་ཐོབ་པར་བྱེད་པ་ཡང་མ་ཡིན་ཏེ། སྐད་ཅིག་མ་ཉིད་ཀྱི་ཕྱིར་རོ། །གང་གཟུགས་མཐོང་བ་ལ་རེག་བྱ་ཐོབ་པར་བྱེད་ན་ནི་དེའི་ཕྱིར་གཞན་མཐོང་ཞིང་གཞན་ཐོབ་པར་བྱེད་པས་རྟོགས་པ་མ་ཡིན་པར་འཐོབ་པར་བྱེད་པའི་ཕྱིར་ཇི་ལྟར་ཚད་མ་ཉིད་དུ་འགྱུར་[1]ཞེ་ན། མ་ཡིན་ཏེ། དངོས་པོར་ན་གཞན[2]ཐོབ་ཏུ་ཟིན་མོད། འོན་ཀྱང་མཐོང་བ་ཁོ་ན་བདག་གིས་ཐོབ་པོ་སྙམ་དུ་གཅིག་ཉིད་དུ་ལྷག་པར་ཞེན་པ[3]ལས་རྟོགས་པ་ཐོབ་པར་བརྗོད་དོ། །གང་སྔིག་རྒྱུ་ལ་སོགས་པ་ལ་ཆུ་ལ་

---

1 ལེགས་སྦྱར། ཚད་མར་རིགས་པར་འགྱུར།

2 ལེགས་སྦྱར། དངོས་པོར་ན་གལ་ཏེ་གཞན་ཉིད།

3 རིགས་ཐིགས་རྒྱ་ཆེར་འགྲེལ། ཅེ ༣༣༨ བ ཕྲེང་ ༥ ཡུལ་ངེས་པ་དང་རྣམ་པར་ངེས་པ་དེ་ནི་ཁྱད་པར་ནུས་པ་ཡིན་གྱི། དུས་གང་ཡིན་པ་གོ་ཡོངས་སུ་བཅད་པའི་དུས་གང་ཡིན་པ་དེ་ཉིད་དང་

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

སོགས་པའི་རྣམ་པར་ཤེས་པ་དེ་ནི་དོན་ཐོབ་པར་རུང་བ་མ་ཡིན་པ་ཉིད་ཀྱི་ཕྱིར་ཚད་མ་མ་ཡིན་པ་ཁོ་ནའོ།།[1]

དོན་ཉེ་ནུས་པར་གནས་པ་བཤད་པ།

འོ་ན་འདི་ནི་ཐོབ་པར་བྱེད་པར་རུང་བའོ། །འདི་ནི་མ་ཡིན་ནོ་ཞེས་དོན་བྱ་བ་ནི་ཐོབ་པ་མེད་པར་ངེས་པར་མི་ནུས་ལ། ཤེས་པ་སྐྱེ་བ་ཙམ་གྱིས་ན་འཁྲུལ་པ་དང་། མ་འཁྲུལ་པ་དག་གིས་བྱེ་བྲག་མི་རྟོགས་པས་དེའི་ཕྱིར། དེ་ཇི་ལྟར་ཡང་དག་པའི་ཤེས་པ་ཞེས་བྱ་ཞེ་ན། སྐྱོན་འདི་ནི་མེད་དེ། ཤེས་པ་ཙམ་སྐྱེ་བ་ལས་འདི་དག་གི་ཁྱད་པར་རྟོགས་པར་མི་ནུས་མོད། །འོན་ཀྱང་ཤེས་པའི་ཁྱད་པར་སྐྱེས་པ་ལས་ཏེ། ཇི་ལྟར་གཅིག་གི་ཁྱད་པར་ཅན་ཡིན་པ་དེ་ལྟར་བརྗོད་དོ། །དེ་ལྟར་ཡང་བློ་ཁན་པས་ནི་སྐྱེས་པའི་དབང་ལས་ཤེས་པ་མི་སླུ་བ་ཉིད་དུ་རྟོགས་པར་མི་ནུས་མོད། འོན་ཀྱང་སྲིག་པ་དང་། འཆད་པ་དང་། འགོག་པ་དང་། ཁྲུས་དང་། བརྟན་པ་དང་།[2] བསྒྲུ་བ་ལ་སོགས་པའི་དོན་

ཕྲད་པར་མི་ནུས་པ་མ་ཡིན་ནམ་ཞེ་ན། གང་གི་དུས་ན་ཡོངས་སུ་བཅད་པའི་དུས་དེ་ཉིད་ཀྱི་ཚེ་ཕྲད་པར་བྱ་བ་ཡིན་པར་མི་སྨྲ་སྟེ། མཐོང་བའི་དུས་ཀྱང་གཞན་ཕྲད་པའི་དུས་ཀྱང་གཞན་ཡིན་པའི་ཕྱིར་རོ། །འོན་ཀྱང་དུས་གང་དུ་ཡོངས་སུ་བཅད་པའི་དངོས་པོ་དེ་ཉིད་དང་ཕྲད་པར་བྱ་བ་ཡིན་ཏེ། ཐ་དད་མེད་པར་མངོན་པར་ཞེན་པའི་ཕྱིར་རྒྱུན་གྱིས་ཞུགས་པ་ལ་གཅིག་པ་ཉིད་དུ་བལྟ་བར་བྱའོ།།

1 ཚད་མ་རྒྱན། ཏ ༨ ན ཕྲེང་ ༨ གང་ལ་དོན་བྱེད་པ་ཐ་དད་པར་མངོན་པར་འདོད་པ། དཔེར་ན་སྨིག་རྒྱུ་ལ་ཆུར་འཛིན་པའི་ཤེས་པ་ལས་སྨིག་རྒྱུའི་དོན་བྱེད་པ་ཐོབ་པ་དེ་ནི་ཚད་མ་མ་ཡིན་པ་ཉིད་དོ།།

2 ལེགས་སྦྱར། བཏུང་བ་དང་།

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

བྱེད་པ་རིང་པོ་ནས་ཉམས་སུ་མྱོང་བའི་སྐྱེས་བུ་མཐོང་བས་སམ། དུ་བ་ཕྱུར་བ་ལ་སོགས་པ་མཐོང་བས་ངེས་པར་འཛིན་པར་བྱེད་དོ། །བློ་མི་ཁན་པས་ནི་ཤིན་ཏུ་གསལ་བའི་མངོན་སུམ་ཁོ་ནས་རྟོགས་པར་བྱེད་དོ།།[1]

འོ་ན་གལ་ཏེ་[2]མི་སླུ་བའི་མཚན་ཉིད་ཅན་ཚད་མ་ཉིད་ཡིན་པ་དེའི་ཚེ་རྣ་བའི་རྣམ་པར་ཤེས་པ་རྟོགས་པའི་དོན་ཐོབ་པར་བྱེད་པ་མ་ཡིན་པའི་ཕྱིར་ཇི་ལྟར་ཚད་མ་[3]ཉིད་ཡིན་ཞེ་ན། མ་ཡིན་ཏེ། དོན་གྱི་རང་གི་ངོ་བོ་རྟོགས་པ་ནི་ཚད་མ་ཉིད་ཡིན་ལ་དེ་ཡང་ཕྱི་རོལ་གྱི་དོན་གྱི་བྱ་བ་ཐོབ་པ་མེད་པར་ཡང་འགའ་ཞིག་ཏུ་ཡང་སྲིད་པའི་ཕྱིར་རོ། །གང་གསུངས་པ།

ཚད་མ་[4]སླུ་མེད་ཅན་ཤེས་པ། །
དོན་གྱི་བྱ་བ་གནས་པ་ནི། །
མི་སླུ[5] །ཞེས་སོ།།

སྒྲ་ནི་མཉན་པ་ཙམ་ཉིད་ཀྱིས་དོན་དཔྱད་ཟིན་པ་ཉིད་ཀྱི་ཕྱིར་མཉན་པ་[6]པོ་ནི་དེར་དོན་གྱི་བྱ་བ་གནས་པ་སྟེ། དཔེར་ན་ཉི་མ་དང་ཟླ་བ་དང་སྤྲིན་དང་རི་

---

1 ལེགས་སྦྱར། རྟོགས་པར་བྱེད་ཀྱི། དོན་བྱེད་པ་ཐོབ་པ་ལས་ནི་མ་ཡིན་ནོ།།

2 བོད་འགྱུར། འོ་ན་གལ་ཏེ་དོན་བྱ་བ་ཐོབ་པ་ན།

3 བོད་འགྱུར། ཚད་པ།

4 བོད་འགྱུར། ཚད་པ།

5 ཚད་མ་རྣམ་འགྲེལ། ཅེ ༡༠༧ བ ཕྲེང་ ༣
ཚད་མ་བསླུ་མེད་ཅན་ཤེས་པ། །དོན་བྱེད་ནུས་པར་གནས་པ་ནི། །མི་སླུ

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

མོ་ལ་སོགས་པ་རྣམས་མཐོང་བ་ཁོ་ན་དོན་གྱི་བྱ་བ་གནས་པ་བཞིན་ནོ། །དེ་གསུངས་པ།

ཤེས་བྱའི་རང་གི་ངོ་བོ་རིག་པ་ཁོ་ན་དེ་ལ་དོན་གྱི་བྱ་བ་གནས་པར་འདོད་དོ།[1] །ཞེས་སོ།།

དང་པོ་ནི་རྟོག་པ་དང་ལྡན་པ་དོན་བྱ་བ་དོན་དུ་གཉེར་བ་ཉིད་ཀྱིས་ཆུ་དང་མེ་[2]ལ་སོགས་པ་ལ་དོན་གྱི་བྱ་བ་ལ་ཐེ་ཚོམ་ཟ་བ་ཁོ་ནས་འཇུག་སྟེ། གལ་ཏེ་དེ་ལ་འདི་ལྟ་བུའི་ཐེ་ཚོམ་མེད་པར་འཇུག་དུ་ཆུག་ཀྱང་།[3] །འོན་ཀྱང་སྒྲུབ་པར་བྱེད་པ་དང་གནོད་པར་བྱེད་པའི་ཚད་མ་མེད་པའི་ཕྱིར་རོ།[4] །གང་གསུངས་པ།

ཐེ་ཚོམ་འགྱུར་བ་གང་གིས་བཟློག་པར་བྱེད། །ཅེས་སོ། །

6 བོད་འགྱུར། མཉམ་པ།

1 ཚད་མ་རྒྱན། ཏེ ༣ ཤློཀ ༡༡ པ ཕྲེང་ ༣ ཅི་སྟེ་རང་གི་ངོ་བོ་རིག་པ་མ་ཡིན་ན། དེའི་ཚེ་ཚད་མ་ཉིད་མེད་པར་འགྱུར་ན། ཕྱོགས་འདི་ནི་ཁྱེད་ཀྱིས་བཟོད་པ་མ་ཡིན་ནོ་ཞེ་ན། དེ་ནི་མ་ཡིན་ཏེ། ཤེས་པའི་རང་གི་ངོ་བོ་ཉིད་ཚད་མའམ་མི་སླུ་བ་ཅན་མ་ཡིན་གྱི། འོན་ཀྱང་དོན་བྱེད་ནུས་པར་གནས་པ་ཡིན། མི་སླུ ཞེས་སོ།།

2 བོད་འགྱུར། མེ་ལོང་།

3 ལེགས་སྦྱར། གལ་ཏེ་དེ་ཉིད་ལ་ཐེ་ཚོམ་མེད་པ་ཡིན་དུ་ཆུག་ཀྱང་བདག་ལ་འཇུག་གོ་ཞེ་ན།

4 ལེགས་སྦྱར། ཚད་མ་མེད་པའི་ཕྱིར་ཐེ་ཚོམ་རིགས་པར་འགྱུར་བ་གང་གིས་བཟློག་པར་བྱེད་ཅེས་པའོ། །ལུང་དྲངས་པའི་དོན་མི་སྣང་ངོ་།།

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

དེའི་ཕྱིར་འདི་ནི་གནས་པ་ཉིད་དེ། དོན་གྱི་བྱ་བའི་ཐ་སྙད་རྟོགས་པ་བར་ཆད་མེད་པས་ཤིན་ཏུ་གསལ་བའི་མངོན་སུམ་སྐྱེས་པ་ཁོ་ན་ལས་དོན་ལ་རབ་ཏུ་འཇུག་ལ། བློ་ཞན་པས་ནི་དེ་དང་མཐུན་པའི་རྗེས་སུ་དཔག་པ་ལས་སོ། །ཞེས་སོ། །དེ་ཉིད་ཀྱི་ཕྱིར་མངོན་སུམ་ནི་རང་ཉིད་ཁོ་ན་ལས་ཚད་མ་ཉིད་དོ།། ཁ་ཅིག་ནི་གཞན་ལས་སོ། །རྣལ་འབྱོར་པའི་ཤེས་པ་དང་རང་རིག་པའི་ཤེས་པ་ནི་རང་ཉིད་ཁོ་ན་ལས་ཚད་མ་ཉིད་དོ། །རྗེས་སུ་དཔག་པ་ནི་ངེས་པའི་བདག་ཉིད་ཅན་ཉིད་ཀྱི་ཕྱིར་རང་ཉིད་ཁོ་ན་ལས་ཚད་མའོ། །ཞེས་སློབ་དཔོན་གྱིས་གསུངས་སོ།།[1]

སྣར་མ་རྟོགས་པའི་སྒྲོ་ཡུལ་བཤད་པ།

དེས་ན་དོན་ནི་འདི་ཡིན་ཏེ། གང་དང་པོ་ཁོ་ནར་ཡུལ་ལ་འཇུག་པའི་ཤེས་པ་ལ་དེ་ཁོ་ན་ཚད་མ་སྟེ། དེ་ཉིད་ལ་ཕྱིས་སྐྱེས་པའི་ཤེས་པ་གཞན་ནི་མ་ཡིན་ཏེ། བཟུང་ཟིན་པ་འཛིན་པ་ཉིད་ཀྱིས་དེའི་ཚད་མ་ཉིད་མ་ཡིན་པའི་ཕྱིར་རོ། །དཔེར་ན་རྟོག་[2]པ་དང་བྲལ་བའི་བུམ་པ་མཐོང་ནས་ཕྱིས་ཡུལ་དེ་ཉིད་ལ་འདི་བུམ་པའོ་ཞེས་ལྷག་པར་ཞེན་པ་རྣམ་པར་རྟོག་པ་དང་བཅས་པའི་ཤེས་པ་དྲན་པའི་ངོ་བོ་འམ། ཡང་ན་ལ་ལ་སོགས་པ་ལ་དུ་བ་མཐོང་ནས་འདི་ན་མེ་ཡོད་དོ

1 ལེགས་སྦྱར། སློབ་དཔོན་གྱིས་གསུངས་ཞེས་པ་མི་སྣང་ཞིང་། ལུང་འདྲེན་ཡིན་པའང་མི་གསལ།

2 བོད་འགྱུར། རྟོགས།

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

ཞིས་པའི་རྗེས་སུ་དཔག་པའི་ཤེས་པའི་དེ་མ་ཐག་ཏུ་སླར་ཡང་དེ་ཁོ་ན་ལ་འདི་ན་མི་ཡོད་དོ་སྙམ་པའི་རྗེས་སུ་དཔག་པའི་ཤེས་པ་བཞིན་ནོ།།[1]

དབང་པོ་ཚད་མ་མ་ཡིན་པར་བསྟན་པ།

ཡང་དག་པའི་ཤེས་པ་ཚད་མའོ་ཞེས་བརྗོད་པས་ན་ཤུགས་ལས་ཐེམས་པོའི་རང་བཞིན་དབང་པོ་ལ་སོགས་པ་ནི་ཡོངས་སུ་གཅོད་པར་བྱེད་པ་ཉིད་མེད་པའི་ཕྱིར་ཚད་མ་ཉིད་བསལ་ལོ།[2] །ཡོངས་སུ་གཅོད་པར་བྱེད་པ་ཉིད་ནི་རྟོགས་པར་བྱེད་པ་པོ་ཉིད་ཡིན་ཞིང་དེ་ཡང་ཤེས་པ་ཁོ་ནའི་གཙུག་མའི་ངོ་བོ་ཡིན་ན། དེ་ཤེས་པ་མ་ཡིན་པའི་བདག་ཉིད་དབང་པོ་ལ་སོགས་པའི་ངོ་བོར་འགྱུར་བར་འདི་ལྟར་འོས་ཞེས་པའོ།།

ཚད་མའི་དབྱེ་བ། མངོན་སུམ་གྱི་ངེས་ཚིག

དེ་རྣམ་[3]གཉིས་ཏེ། མངོན་སུམ་དང་ནི་རྗེས་སུ་དཔག ཅེས་པའོ། །དབང་པོ་སོ་སོ་བར་གྱུར་པ་ནི་མངོན་སུམ་མོ། །ཨཀྵ་ནི་དབང་པོ་སྟེ། མིག

1 རིགས་ཐིགས་རྒྱ་ཆེར་འགྲེལ། ༣༧ བ ཕྲེང་ ༧ དེ་བས་ན་མ་བཅད་པའི་ཡུལ་ཅན་ནི་ཚད་མ་ཡིན་ཏེ། ཤེས་པ་གང་གིས་ཐོག་མ་ཉིད་དུ་དོན་རྟོག་པ་དེ་ཉིད་ཀྱིས་སྐྱེས་བུ་བཙུག་པར་གྱུར་ཅིང་དོན་དང་ཕྲད་པར་གྱུར་པ་ཡང་ཡིན་ཏེ། དོན་དེ་ཁོ་ན་ལ་ནི་ཤེས་པ་གཞན་གྱིས་ལྷག་པ་ཅི་བྱར་ཡང་མེད་དོ། །དེ་བས་ན་བཅད་པའི་ཡུལ་ཅན་ནི་ཚད་མ་མ་ཡིན་ནོ།།

2 ཚད་མ་རྣམ་འགྲེལ་གྱི་འགྲེལ་པ། ལེ ༣༦༨ ན ཕྲེང་ ༨ ཤེས་པ་ནི་ཚད་མ་སྟེ། དེ་ཡོད་ན་ཡོངས་སུ་གཅོད་པ་འགྲུབ་པའི་ཕྱིར་དང་། དབང་པོ་ལ་སོགས་པ་ལ་དེ་ལྡོག་པའི་ཕྱིར་རོ།།

3 བོད་འགྱུར། དེ་རྣམས།

CC0. In Public Domain. Prof. Ambika Dutt Sharma, Varanasi Collection

Digitization by American Academy of Indic Studies. AAIS(USA)

